रजतजयन्ती ग्रन्थमाला-१३

आचार्यो दण्डी

(समीक्षात्मकमध्ययनम्)

योगेश्वरदत्त शर्मा पाराशरः




राष्ट्रिय-संस्कृत-संस्थानम्

संस्कृतसाहित्यस्य काव्यक्षेत्रे दण्डिनाम्ना कोऽपि संस्कृतसाहित्यस्याध्येताऽपरिचितो नास्ति । भरतमुनेरनन्तरं विद्यमानेषु प्राचीनालङ्कारिकेष्वेषोऽन्यतमः । संस्कृतभाषाया माध्यमेन जिज्ञासवः शोधछात्राः, सामान्यपाठकाश्चैतेन सरलतया परिचिताः स्युर्लक्ष्यमिदं मनसि निधाय मानव सन्साधनविकासमन्त्रालयान्तर्गतेन राष्ट्रियसंस्कृतसंस्थानेन रजतजयन्त्युपलक्ष्ये प्रकाश्यमानेषु ग्रन्थेषु प्रकाश्यते पुस्तकमिदम् ।

आचार्यस्य दण्डिनो रचनाः काः कतिसंख्याश्च साहित्यस्य काव्यक्षेत्रे तस्य किं स्थानम् । तस्य काः का नवीना उद्भावनाः ? गद्यकाव्यकाररूपेण च तस्य किं स्वरूपम् ? दण्डिनः समाजचित्रणं कीदृशम् ? पूर्ववर्त्तिनामाचार्याणां दण्डिनि कीदृशः प्रभावः ? उत्तरवर्त्तिन आचार्या दण्डिनः काः काः प्रवृत्तीरनुकुर्वन्ति । सर्वमेतदत्र सोदाहरणं सालोचनं च प्रस्तुतम् ।


आचार्यदण्डिनो विपये, तस्य कृतीनां विपये, तत्समालोचनापक्षे च निर्णायकमतान्यत्र निर्दिष्टानि ।




रजतजयन्तीग्रन्थमाला-१३

आचार्यो दण्डी

(समीक्षात्मकमध्ययनम्)



योगेश्वरदत्तशर्मा पाराशरः





राष्ट्रिय-संस्कृत-संस्थानम्

नई दिल्ली


प्रकाशकः—
डॉ. कमलाकान्तमिश्रः
निदेशकः
राष्ट्रिय-संस्कृत-संस्थानम्
ए-४०, विशाल एन्क्लेव, राजा गार्डन
नई दिल्ली-११००२७

रजतजयन्तीग्रन्थमाला।

वर्षः १९९५

विक्रम संबत् २०५२

मूल्यम्:





मुद्रकः—
नागप्रकाशकः
११ ए/यू. ए. जवाहर नगर, दिल्ली-११०००७

प्राक्कथनम्

'योऽनूचानः स नो महान्' इत्यागमस्योद्घोषं परिदधत् स्वोद्देश्यं साधु निर्वहदिदं राष्ट्रियसंस्कृतसंस्थानं रजतजयन्तीवर्षं पूरयतीति विज्ञाय समेषां विपश्चितां संस्कृतानुरागिणाञ्च चेतोऽवश्यं मोमुद्येत ।

प्राचीनशास्त्राणां ज्ञाननिधीनां संरक्षणसंवर्धनाभ्यां सह संस्कृतपरम्पराया राष्ट्रियैकात्मतासंवर्धनशक्तेश्च प्रचारार्थं संस्थानस्य योगदानं नास्त्यविदितं संस्कृत-लोके ।

संस्थानस्य रजतजयन्तीमहोत्सवावसरे राष्ट्रस्यास्य विभिन्नप्रान्तेषु विद्योतमानैर्विद्वत्तल्लजैः विविधशास्त्रविषयानवलम्ब्य विरचितानि ग्रन्थकुसुमानि सादरं सञ्चित्य संग्रथ्य च रजतजयन्तीग्रन्थमालात्वेन तत्रभवतां समक्षं प्रस्तूय महान्तमानन्दं सन्तोषञ्चनुभवामः ।

तत्रायं आचार्यो दण्डी नामा ग्रन्थः लब्धप्रतिष्ठैः अवदातविद्या-विद्योतमानमानसैः प्रो० योगेश्वरदत्तशर्मपाराशरैः प्रणीतः आचार्यस्य दण्डिनः व्यक्तित्वकृतित्वयोः परिचयं साधु विदधाति । आचर्यस्य कृतिषु नवीना उद्‌भावना गद्यसाहित्येषु तदीयकाव्यस्य स्थानं तदीयां रचनारीतिञ्चाधिकृत्य प्रामाणिकं विशदं चालोचनं लेखकमहोदयैः सुष्ठु विहितम् एतदर्थं प्रो० योगेश्वरदत्तशर्माणः अस्माकं भृशं धन्यवादार्हाः ।

रजतजयन्तीग्रन्थमालायाः आयोजनप्रकाशनादिकार्येषु निर्दिष्टं दायित्वं निर्वहन्तोऽस्माकं सहयोगिनः विशेषतः डॉ. सवितापाठक डॉ. आर.देवनाथन् प्रभृतयः साधुवादार्हाः विद्यन्ते ।

नागप्रकाशकाधिकारिणः अल्पीयसि काले ग्रन्थममुं सम्मुद्र्य यथासमयं विमोचनाय च प्रस्तूय अस्माकं सङ्कल्पसिद्धौ विशिष्टसहयोगं कृतवन्तः अतस्ते धन्यवादार्हाः ।

कमलाकान्तमिश्रः
निदेशकः
राष्ट्रियसंस्कृतसंस्थानं, नवदेहली

दिनाङ्कः ११.१०.९५
कार्तिककृष्णतृतीया, २०५२

भूमिका

संस्कृतसाहित्यस्य काव्यक्षेत्रे दण्डिन आचार्यस्य प्रमुखं स्थानमस्ति। अयमाचार्यो भरतमुनेर्नाट्यशास्त्रस्यानन्तरं प्राचीनेष्वालङ्कारिकेष्वन्यतमः। सामान्यतः भामहदण्डिनोः कः पूर्वतरः इत्यस्ति जटिलः प्रश्नः। समाधातुमिमं प्रश्नं प्रायशोऽनेके समालोचकाः प्रयतमानाः आसन्, सन्ति, भविष्यन्ति च।

बहवोऽन्तःसाक्ष्यस्याधाराः सन्ति येषामनुसारं दण्डिनः कालः सप्तमशताब्द्या आरम्भ एव निर्णीयते। तथापि एतादृशप्रमाणान्यपि सन्ति, यैः षष्ठशताब्दी कालोऽस्य निर्णेतुं शक्यते। एतादृशानां सर्वेषां साक्ष्याणां निरूपणं कृत्वा प्रमाणत्वेन दण्डिनः समयः सप्तमशताब्द्येव निर्णीतः।

दण्डिनः रचनानां सम्बन्धेऽपि बहवो विरोधाभासाः सन्ति। तेषामप्यत्र गम्भीरविवेचनं कृत्वा निर्णीयते यत्— दण्डिनः तिस्रः कृतयः सन्ति-काव्यादर्शः, दशकुमारचरितम्, अवन्तिसुन्दरीकथा च। तासु काव्यादर्श उत्तरवर्त्तिनां सर्वेषामाचार्याणां कृते काव्यक्षेत्रे प्रकाशस्तम्भः। इमं ह्यनुसृत्यान्ये सर्वे काव्याचार्या अलङ्काराणां, गुणानां दोषाणां, रीतीनां च विकासमुकुर्वत।

यावच्चालङ्कारयुगः सम्वर्धमान आसीत् तावद् दण्डिनः बहुसम्मानमभवत्। यदा च काव्यात्मरूपे विविधानां सम्प्रदायानां रीतिवक्रोक्तिध्वन्यादीनां विकासः प्रारब्धः तदा दण्डिनः सिद्धान्ताः शनैः शनैः काव्यरूपेष्वन्तर्भुक्ताः। परं तथापि दण्डिनो नाम कदापि विस्मरणीयं नैवाभूत्। यतो हि काव्यात्मतत्त्वमपि दण्डिना परोक्षरूपेण रीतिगुणदोष-लक्षणेषु सम्यक् प्रतिपादितम्। न केवलमिदमेव वामनस्य "रीतिरात्मा काव्यस्य" इति लक्षणे दण्डिनः काव्यमार्गस्य महद् योगदानं वर्तते।

एवमेकत्राचार्यस्य दण्डिनः काव्याकरकर्तृत्वं स्फुटमपरत्र च गद्यकर्तृत्वमपि बहु द्योतमानं दृश्यते।-दण्डिनः पदलालित्यस्य प्रशंसा यथा सर्वत्रैवोद्घुष्यते तथैव तस्य प्रासादिकशैल्या अपि सर्वत्र प्रशंसनं क्रियते। दण्डिनो गद्यलक्षणमस्ति "अपादः पदसन्तानो गद्यम्" एतेन दण्डिनो वैदर्भीरीतिस्नेहः

स्पष्टः। अत एव काव्यमार्गेषु वैदर्भ्याः संस्तवं कृत्वा दण्डी माधुर्यस्य स्तुतिमादधाति।[१]

गद्यकृतिषु दण्डिनो दशकुमारचरितस्य विशिष्टं स्थानम्। यतो हि मुख्यतो गद्यकाराः त्रयः, सुबन्धुः, दण्डी बाणश्च। तेषु दण्डी पूर्ववर्तिनो गुणाढ्यस्य बृहत्कथामनुसृत्य दशकुमारचरितमरचयत्। वस्तुत एषा कृतिरपूर्णा। काभ्यामन्याभ्याम् विद्वद्भ्यां तस्याः पूर्वपीठिकोत्तरपीठिका च संयोजिता। यदि पूर्वपीठिका न स्यात् तर्हि रचनाया अस्या अभिधानमेव दुष्टं स्यात्। उत्तरपीठिकाकर्तृत्वे तु चक्रपाणिदीक्षितस्य नाम श्रूयते परं पूर्वपीठिकाकर्तृत्वे कस्यापि नामैतिहासिकैः समालोचकैर्न प्राप्यते। एतस्य दशकुमारचरितस्य महती विशेषताऽस्ति तात्कालिकस्य समाजस्य यथार्थं चित्रणम्।

तृतीया रचना अवन्तिसुन्दरी कथाभिधा। अस्या उपलब्धिः दक्षिणे प्रान्ते (मद्रास नगरे वा) सञ्जाता। कामं कृतिरियं लघ्वी तथापि दण्डिनः कृतिरेवेयमिति शैल्या अस्या निर्णीयते। इदं च कथयितुं पार्यते यल्लेखको दशकुमारचरितमेव संशोधितं कृत्वा प्रौढरचनारूपेऽवन्ति-सुन्दरी-कथां रचयामास। अस्या कृतेः शैली प्रौढा परिपक्वा च। न चाद्यावधि कृतेरस्या लेखकत्वेन कस्याप्यन्यस्य नाम, परिचयो वा समधिगतः। अतो दण्डिन एव कृतिरियम्।

न च छन्दोविचितिनाम्नी तस्य कृतिः। यतो हि छन्दोविचितिः केवलं छन्दसां वैदिकछन्दसां वाऽऽकरग्रन्थो भवितुमर्हति। तस्य च लेखकत्वेनाचार्यस्य पिङ्गलस्यैव नाम निर्दिश्यते।

एवमेव कलापरिच्छेदापरनामापि ग्रन्थो दण्डिना नैव रचितः। एष तु काव्यादर्शस्य तृतीयपरिच्छेदस्यैवोत्तरांशो भवितुमर्हति यस्मिन्

---

१ मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः॥
काव्यादर्शः : १-५१

लेखकोऽवाञ्छत् कलानां परिचयं दातुम्। अतो दण्डिनः तिस्र एव रचनाः।

महतो हर्षप्रकर्षस्य विषयोऽयं यद् आचार्यो दण्डी (समीक्षात्मकमध्ययनम्) इति नाम्ना पुस्तकमिदं मानवसंसाधनविकासमन्त्रालयान्तर्गत- राष्ट्रिय-संस्कृत-संस्थानस्य रजतजयन्तीवर्षे प्रकाश्यते। अहमस्मि राष्ट्रिय-संस्कृतसंस्थानस्य निदेशकानां डा.कमलाकान्तमिश्रमहोदयानामधमर्णो यैर्मह्य-मवसरः प्रदत्तः आचार्यदण्डिनो विषये स्वविचारान् प्रकटयितुम्। आशासे भविष्यत्यपि पुनरीदृशमवसरमहमवश्यं समधिगमिष्यामि।

विदुषां वशंवदः,

योगेश्वरदत्तशर्मा पाराशरः

विषय-सूची

I

आचार्यो दण्डी

संस्कृतसाहित्यव्योम्नि येऽपि लेखकाः कवयो वा सन्ति तेषु यदि कोऽपि काव्यकृत् तर्हि स काव्याकार एव, अन्यः चेन्नाटककारः तर्हि स नाटकरचयिता एव। परं स्वकीय-विविधरचनाकारकत्वेन केवलमेक एव सूर्यत्वेन नक्षत्रेषु ग्रहेषु वा दीव्यति यः काव्यलक्षणकारकत्वेन गद्यकर्तृत्वेन, कथाकर्तृत्वेन च परिचयमात्मानं समालोचक-समक्षमभिव्यनक्ति सोऽस्त्याचार्यो दण्डी।

एकत्राचार्यो दण्डी काव्यादर्शं (काव्यलक्षणं वा) रचयति, अन्यत्र गद्य-कृतिं दशकुमारचरितं चरित्रयति, अपरत्र चावन्तिसुन्दरीकथां गुम्फति। इदमत्रविषये मुख्यतोऽभिधेयमस्ति-यथा कोऽपि आलोचकः नाटककर्तृत्वेन, काव्यकर्तृत्वेन वा कालिदासद्वयं स्वीकर्तुमीहते, कारिकाकर्तृत्वेन, वृत्तिकर्तृत्वेन वा साहित्यदर्पणकारं विश्वनाथं भिन्नत्वेनोररीकरोति, परं प्रामाणिकताया अभावेन निष्कर्षतः एक एव कालिदासः। एक एव विश्वनाथो वोररीक्रियते तथैव आचार्यो दण्डी वस्तुतः एक एव।

दण्डिन एकत्वम्

त्रयोऽग्न्यस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः॥[१]

अनुष्टुबिदं शार्ङ्धरपद्धतौ, सूक्तिमुक्तावल्यां राजशेखरनाम्नोद्धृतमस्ति। अस्यानुसारं दण्डी प्रबन्धत्रयस्य रचयिता वर्तते। प्रथमः-काव्यादर्शः, द्वितीयः दशकुमार-चरितम्, तृतीयश्चावन्तिसुन्दरीकथा। त्रय एवैते प्रबन्धा

---

१ शार्ङ्धरपद्धति-१७४, सूक्तिमुक्तवावली ४७४

विषयशैलीभावस्वर दृष्ट्या च सुतरां भिन्नाः। अतो विद्वांसः स्पष्टतया न तु दण्डिनमेकं स्वीकुर्वते न चैव च दण्डित्रयम्। काव्यादर्शस्य कर्तृत्वेन तु दण्डी सर्वेषामालोचकानामभिमतः। परं त्रिवेदीमहोदयः,[१] आगाशे[२] महोदयश्च दशकुमारचरितमपि दण्डिकृतं न स्वीकुरुतः। एतयोरभिमतमस्ति यत् दण्ड़िविहितं दोषनिरूपणं दशकुमारचरित एव दृश्यते। परं नैतदुचितम्। यतो हि काव्यनियम-निरूपणमन्यत्, तेषां च स्वकृतिष्वनुपयोगोऽन्यत्। एतादृशं निरूपणं हि क्षेमेन्द्रस्यौचित्यविचारचर्चायां नैवोपलभ्यते, तेन हि स्वरचितपद्यान्येव उदाहरणत्वेन दर्शितानि।

अन्यदपि सम्भवं यत् काव्यादर्शस्यलक्षणदिनिरूपणपूर्वमेव दण्डिना दशकुमारचरितं लिखितं स्यात्। आगाशेमहोदयस्याभिमतमिव डा.ऐस.के.दे.महोदयोऽपि दशकुमारचरितं काव्यादर्शं अवन्तिसुन्दरीकथाञ्च दण्डिकृतां नैव मन्यते। तदनुसारं दशकुमारचरितावन्तिसुन्दरीकथयोः शैली-साम्यं नैव विद्यते। किञ्च काव्यादर्शानुसारेण काव्ये (पद्ये, गद्ये वा) भावेषु ग्राम्यता, कामुकता, द्यूतं, स्तेयं, व्यभिचारवर्णनं, रक्तरञ्जितवर्णनं च न स्यात्, परं दशकुमारचरिते तु सर्वेषामेतादृशवर्णनानां बाहुल्यमस्ति। परं देमहोदय-स्यापि विचारो नैवानुकूल्यमर्हति, यतो हि संस्कृतसाहित्ये लक्षणोदाहरणानां सानुकूलत्वं प्रायशो दुर्लभमेव। अतः यत्समाधानमागाशेमहोदयस्य विचार-खण्डनार्थं प्रदत्तं तदेव समाधानं देमहोदयस्य मतनिराकरणार्थं दातुं शक्यते। एवं च एकाधिकदण्डिनां परम्पराया अभावाद् दण्डिन एकत्वमेव सिध्यति। यद्यद्, यादृशं तादृशं वा शैलीभेदो भावस्वरभेदो वा कैश्चिदा-लोचकैः प्रस्तूयते, तादृशमन्तरं तु आचार्यत्वेन, कवित्वेन च सामान्यतः स्वीक्रियते एव। अतः स्पष्टप्रमाण-राहित्येन त्रयः प्रबन्धा एव दण्डिकृताः। दण्डी च वस्तुत एक एव।[३]

---

१ प्रतापरूद्रीययशो भूषणस्य भूमिकायाम्।

२ इण्डियन एंटिक्वेरी १९०५, खिस्ताब्दः पृ. ६७

३ इण्डियन हिस्टॉरिकल क्वार्टरली १.३१३,३.३९४

II

दण्डिनः स्थितिकालः

आत्मनाम गुरोर्नाम नामातिकृपणस्य च।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥

भारतीय शास्त्रेषु, किं वा संस्कृतसाहित्येऽपि मनुसंदर्शिता धारणेयं पर्याप्ततः प्रचलिता। इदमेव मुख्यकारणं यत्प्राचीनाः संस्कृतसाहित्यलेखकाः स्वविषये स्वकीयं परिचयं नैव दत्तवन्तः। इयमेव स्थितिर्दण्डिनो विषयेऽपि दरीदृश्यते। परमालोचकाः तु नीरक्षीरविवेकिनः। ते यथाकथञ्चिदपि साक्ष्यस्यान्तरंरङ्ग-गस्य प्रभावेण बाह्यसाक्ष्यस्य बलेन वा सर्वेषां साहित्यकाराणां स्थितिकालं प्रमाणीकृत्यैव विरमन्ति। अस्तु।

दण्डिनः स्थितिकालस्य विषये प्रमाणानीमानी प्राप्यन्ते—

१. बाह्यसाक्ष्यसम्मतानि–

(i) दशमशताब्दीकालीनः आचार्योऽभिनवगुप्तोध्वन्यालोकस्य लोचननाम्न्यां व्याख्यायां लिखति-यथाह दण्डी-गद्यपद्यमयी चम्पूः।[१]

(ii) ख्रिस्ताब्दस्य ९२५ तमस्याचार्यः प्रतिहारेन्दुराजः काव्यालङ्कारसारसंग्रहे लघुवृत्त्यां लिखति—

अत एव दण्डिना लिम्पतीव[२]-इत्यादि

(iii) ७३७-७९७ शाकब्दस्य (८१५-८७५ तमस्य ख्रिस्ताब्दस्य वा राष्ट्रकूटराजकुमारप्रणीतस्य कनारीभाषायाः कविराजमार्गाभिधस्य ग्रन्थस्यानु-

---

१ ध्वन्यालोकः, लोचनम्, उद्योतः वृत्तिः ३१७

२ काव्यालङ्कारसारसङ्ग्रहः—लघुवृत्तिः पृ.२८

सारेणात्र प्रयुक्ताः साधारणोपमा-असम्भवोपमा-संभवोपमा-विशेषोक्त्या-द्यलङ्काराणां परिभाषाः काव्यादर्शस्य दण्डिरचितस्यालङ्कारलक्षणानामनुवादा एव। अन्यत्रापि च काव्यादर्शस्य प्रभावो लक्ष्यते।

(iv) महावंशानुसारं प्रथमराजसेनराज्यकाले वर्तमानः ८४६-८६६ तमस्य खिस्ताब्दस्य सिंहलीभाषाया (सियाकसलकार) स्वभावालङ्काराभिधस्य लेखकः प्रायशः सर्वत्र दण्डिमतमेवानुकुरुते।[१]

(v) वामनरचितकाव्यालङ्कार सूत्रस्य दण्डिरचितकाव्यादर्शस्य च साम्यावधारणया विवेक्तुं शक्यते यद्-आचार्यो दण्डी वामनपूर्ववर्त्ती लेखकः। आचार्यो दण्डी काव्यस्य द्वौ मार्गौ सूचयति—

तत्र वैदर्भगौडीयौ—[२]

आचार्यो वामनश्च रीति (मार्ग) भेदं त्रित्वेनैव सूचयति-स हि पाञ्चालीनाम्नीं तृतीयां रीतिं दर्शयति[३]— पुनश्च काव्यसम्प्रदायेष्वन्यतमस्य रीति-सम्प्रदायस्य स्थापनामेवं विधत्ते—[४]

रीतिरात्मा काव्यस्य।

अतः सुस्पष्टमिदं यत्—पाञ्चालीमार्गेण, रीतिशब्देन वाऽऽचार्यो दण्डी सर्वथाऽपरिचित आसीत्। एषां प्रमाणानामनुसारं दण्डी वामनतः पूर्ववर्त्ती सिध्यत्येव।

(vi) नीलोत्पलदलश्यामां विज्जिकां मामजानता।[५]
वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती॥

---

१ के.बी.पाठकमहोदयेन सम्पादितम्-१८९८ खिस्ताब्दः
२ काव्यादर्शः— १-४०
३ काव्यालङ्कारसूत्रम्—३.१.१२
४ तत्रैव—१.२.६
५ शार्ङ्गधरपद्धति-संख्या १८०

पद्यमिदं विज्जिकया नाम्या विदुष्या लिखितम्-अनेन साऽऽचार्य-दण्डिलिखितस्य मङ्गलाचरणस्य—

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥[१]

व्यङ्ग्यात्मकमुपहासं करोति। यद् दण्डी विज्जिकया कथमपरिचित आसीदित्यहं न जानामि।

विज्जिकां लेखिकां काव्यप्रकाशकारो मम्मटोप्युद्धरते।

जल्हणस्य सूक्तिमुक्तावल्यां राजशेखरनाम्ना पद्यमिदमुद्ध्रियते—

सरस्वतीव कार्णाटी विजयाङ्का जयत्यसौ।
या विदर्भगिरां वासः कालीदासादनन्तरम् ॥[२]

समालोचका विज्जिकां दाक्षिणात्यां मन्वते। चन्द्रादित्य-साम्राज्ञी भट्टारिकां विजियाङ्कामेव विख्यातां कार्णाटीमभिदधति। चन्द्रादित्यो द्वितीयपुलकेशिनोऽपत्यमासीत् समयो यस्य खिस्ताब्दः ६६० तमः।[३]

संस्कृतसाहित्यगगने दृश्यन्त एतादृश्योऽनेकाः सूक्तयः, टिप्पण्यो वा, यासां व्याख्या स्पष्टतः पूर्ववर्तिनो लेखकान् निम्नपदाङ्कितान् विधातुं प्रयतते—

तद्यथा—

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥

अत्र कालिदासभारविदण्डिनामेकैव विशेषता प्रदर्शिता-परं माघस्तु सर्वांस्तानतिशेते।

---

१ काव्यादर्शः—१-१

२ सूक्तिमुक्तावली-जल्हणः-संख्या १८४

३ इण्डियन एंटिक्वेरी-पुस्तकम्-७ पृ.१६७, पु८ पृ.४८

एवमेव—

उदिते नैषधे काव्ये क्व माघः, क्व च भारविः ?

अत्र श्रीहर्षो भारविमाघावतिशेते—

अतो दाक्षिणात्या विज्जिकापि दण्डिनमतिशयितुं प्रयतते चेत्तर्हि समुचितमेव।

विज्जिकायाः समयस्यैतिहासिकत्वाद् दण्डिनः समयः षष्ठशताब्दीखिस्ताब्द एव सिध्यति। महाकवेः सुबन्धोः समयः खिस्ताब्दः शताब्दीषष्ठीयः। स स्वकीयायामेकस्यामेव कृतौ वासवदत्तायाम्—

१.यश्च छन्दोविचितिरिव कुसुमविचित्राभिः।[१]

२. छन्दोविचितिरिव मालिनी सनाथा।[२]

३. छन्दोविचितिमिव भ्राजमानतनुमध्याम्।[३]

त्रिष्वेतेष स्थानेषु छन्दोविचितिशब्दं ग्रन्थं वा समुल्लिखति।

यद्यप्यद्यावधि दण्डिविरचितश्छन्दोविचितिशीर्षकश्छन्दोग्रन्थो नैवोपलभ्यते परं समालोचकाः कतिपये मन्वते यत्सुबन्धुर्दण्डिविरचितं ग्रन्थं तमेवोद्धरते।

एतया परम्परयाऽपि दण्डिनः समयः खिस्ताब्दः षष्ठशताब्दीकालीनो मन्तुं शक्यते।

श्रीमान् मोक्षमूलरः[४] (मैक्समूलर), श्रीमान् वेबरः[५], श्रीमान् मैक्डोनलः[६] श्रीमान् कर्नलजैक[७]बमहोदयश्च दण्डिनं षष्ठशताब्दीकालीनमेव स्वीकुर्वते।

---

१ इण्डियन ऐंटिक्वेरी-पुस्तकम्-७ पृ.१६७पु८ पृ.४८

२ इण्डियन ऐंटिक्वेरी-पुस्तकम्-७ पृ.१६७पु८ पृ.४८

३ इण्डियन ऐंटिक्वेरी-पुस्तकम्-७ पृ.१६७पु८ पृ.४८

४ इंण्डिया-ह्वाट, केन इट् टीच अस प्रथमसंस्करणम् पृ.३३२

५ हिस्ट्री ऑफ संस्कृत लिट्रेचर वेबरः पृ.२३२

६ हिस्ट्री ऑफ संस्कृत लिट्रेचर मैक्डानलः— पृ.४३४

७ जरनल आव्द रायल एशियाटिक सोसाइटी १८४७ ई.

ये केचन समालोचकाः दण्डिनः समयस्य विषये कानिचिदन्यानि प्रमाणानि वितन्वते तेषां विचारा एवमुद्धर्तुं शक्यन्ते—

१. श्री कालिन्स महोदयः[१] कालिदासस्य रघुवंशस्य दशकुमारचरितस्य च साम्यं विदधत्कथयति—

दशकुमारचरिते द्विविधौ भौगोलिकौ स्वरूपौ स्तः।

(i) प्राचीन भौगोलिकनामानि—

अवन्ती, शूरसेनः, त्रिगर्तश्च। विदेहा-लिच्छवि-वंशीयाः। श्रावस्ती-स्थाण्वीश्वरः। परं नैतदुचितम्—

कालिदासस्तु बाल्मीकिरामायणोद्धृतं भौगोलिकं परिप्रेक्ष्यमेवोररीकरोति-अतः रघुदिग्विजयवर्णने मत्स्य-सिन्धुसौवरिकाशीसुराष्ट्राणामुल्लेखो नैव दृश्यते। कालिन्समहोदयः कालीदासस्य भौगौलिकवर्णने गुप्तपराजनीतिकपरिवर्तनं वर्णयति। चन्द्रगुप्तद्वितीयकाले हि मत्स्यमालवौ मिलितौ, काशी-कौशाम्ब्यौ संयुक्ते। परं इन्दुमतीस्वयंवरवर्णने विदर्भ-मगध-अंग-अवन्ती-अनूप-शूरसेन-कलिंग-पाण्ड्य-उत्तरकोशलादिप्रदेश ानां वर्णनं समुपलभ्यते। दशकुमारचरिते च—

विदर्भ-मगध-अंग-मालव-माहिष्मती-कलिंगानां वर्णनं क्रियते। एवं मुख्यतः द्वयोः ग्रन्थयोः अष्टानां प्रदेशानां साम्यवर्णनं ज्ञात्वैव कालिन्समहोदयः रघुवंश-दशकुमारचरितयोः कालमेकं निश्चेतुं प्रयतते।

परं नैतत्कथमपि समीचीनम्-दण्डी बृहत्कथामाश्रित्य दशकुमारचरितं विरचयामास। सातवाहनाभिलेखानामालोचेनन च दशकुमारचरिते समुद्धृतानां विदर्भादीनां षण्णां प्रान्तानामाधारः सातवाहनयुग एव निश्चीयते। तेषामेव चोल्लेखो बृहत्कथायां वर्तते। अतः दण्डिनः समयः कालिदासेन कथमपि साम्यं नार्हति।

---

१ एम.क़ांलिन्स-जियोग्राफिकल डेट, आफ पृ.२८७ रघुवंश एण्ड दशकुमारचरित लाइप्सीज १९०७

एवमेव आगाशे महोदयो दशकुमारचरितं ख्रिस्ताब्दस्यैकादशशताब्द्यन्तर्गतं स्वीकरोति। तस्याभिमतमस्ति—

दशकुमारचरितस्य सामाजिकं वर्णनमेकादशशताब्द्यनुकूलं दृश्यते। दण्डी यवनवणिज उद्धरतेऽतो दशकुमारचरितं दशमशताब्द्या अनन्तरमेव लिखितं स्यात्। आगाशेमहोदयः दशकुमारचरिते यवनवणिजं खनतिं, यवननाविकं रामेषुं च मुस्लिमवणिजमेव स्वीकरोति। परं डा. उनवालामहोदयानुसारेण 'रामेषु' सीरियनशब्दः। यस्याशयो वर्तते—'सुन्दर ईसा'। सुन्दरः ख्रिस्तः। अतः दशकुमारचरितं ख्रिस्ताब्दस्य षष्ठ्यां शताब्द्यामेव लिखितम्।

मोतीचन्द्रः प्राचीनभारतीयवेशभूषानाम्नि स्वग्रन्थे निश्चिनोति-यत्—

ईरानीप्रणिधिवर्गचित्रणे सीरियन प्रान्तादागता वणिजो भारतीयराज्ञां सम्मुखे उपहारान् दत्तवन्तः।[१]

अत आगाशेमहोदयस्य एकादशशताब्द्यभिमतं दशकुमारचरितसमयं वयं कथमपि स्वीकर्तुं नोत्सहामहे दण्डी यादृशस्य समाजस्य वर्णनं वर्णयति तादृशं शूद्रकस्य मृच्छकटिके, बुधस्वामिनः बृहत्कथाश्लोकसङ्ग्रेह, च दरीदृश्यतेद्वे रचने एव ख्रिताब्दस्य षष्ठीशताब्दीतः पूर्वमेव रचिते। अतः दण्डिनः समयः षष्ठीशताब्दी एव।

ख्रिस्ताब्दस्याष्टमशताब्धन्तर्गतस्यापभ्रंशकवेः स्वयंम्भू महोदयस्य द्वयोरेव कृत्योः रिट्ठणोमिचारिउ (हरिवंश-पुराण,'पउमचारिउ' एतयोः दण्डिनः सादरमाचार्यत्वेनोल्लेखो वर्तते।[२]

अतो दण्डिनः समयः निश्चयेन षष्ठीशताब्दी ई. वर्तते।

---

१ प्राचीन भारतीय वेशभूषा-मोतीचन्द्रः पृ.२११-२१२

२ हिन्दी काव्यधारा पृ. २२-२४ संपादक-राहुलसांकृत्यायन।

III

भामहदण्डिनोः पौर्वापर्य विचारः

भामहदण्डिनोः कः पूर्वः कश्चापरः ? प्रश्नोऽयमपि प्रतीयतेऽनिर्णीत एव। परमस्मिन् विषये यथासंभवं, योऽपि निर्णयोऽत्र तावादित्थं विचार्यते—

अत्रापि अन्तः साक्ष्यबाह्यसाक्ष्ययोः साहाय्येनैव विचारः क्रियते—

भामहदण्डिनोः कृतौ समानाः पाठांशाः—

	भामहः	दण्डी
१. सर्गबन्धो महाकाव्यम्	१.१९	१.१४
२. मन्त्रदूतप्रयाणादिनायकाभ्युदयैश्च यत्	१.२०	१.१७
३.कन्याहरणसंग्रामविप्रलम्भोदयान्विताः	१.२७	१.२९
४. अद्य या मम गोविन्द जाता त्वयि गृहागते। कालेनैषा भवेत्प्रीतिस्तवैवागमनात्पुनः॥ (प्रेयालङ्कारोदाहरणम्)	३.५	२.२७६
५. भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम्	३.५३	२.३६४
६. अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम्। शब्दहीनं यति भ्रष्टं भिन्नवृत्त विसंधि च॥	४.१	३.१२५
७. समुदायार्थ शून्यं यत्तदपार्थकमिष्यते	४.८	३.१२८
८. गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।	२.८१	२.२४४
९. आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना।	२.६६	२.४

एतेषु नवसु पाठेषु दण्डी यत्पाठान्तरं विहितवान् नास्ति तत्र विशिष्टान्तरम्—

यथा—

द्वितीये पाठे—दण्डिना अभ्युदयैश्च इत्यत्र अभ्युदयैरपि कृतः।

तृतीये पाठे—उदयान्विताः, इत्यत्र उदयादयः।

पञ्चमे पाठे—भाविकत्वमित्यत्र तद्भाविक—

षष्ठे पाठे— विसंधि इत्यत्र विसन्धिकम्।

सप्तमे पाठे—तदपार्थकमिष्यते इत्यत्र तदपार्थकमितीष्यते।

एषु पाठांशेषु परस्परं सम्पूर्णप्रभावस्तु दृश्यते। केवलमित्येव निर्णेयं कः पूर्वः कः परः ?

भामहः कथामाख्यायिकां च परस्परं भिन्नां वर्णयति परंः दण्डी प्रायशः समानामेव वर्णयति।

तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयान्विता।
अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः॥[1]

दण्डी परिहारिकां प्रहेलिकां वा पद्येनैतेन परिभाषते-यथा—

विजितात्मत्रवद्वेषिगुरूपादहतो जनः।
हिमापहामिभधरैर्व्याप्तं व्योमाभिनन्दति॥[2]

भामहस्तु पद्यस्यास्यांशं—

हिमापहामित्रधरैर्व्याप्तं व्योमेत्यवाचकम्।

अवचकदोषोदाहरणरूपं कलयति।

---

१ काव्यादर्शः-दण्डी १-२८,२९

२ काव्यादर्शः-दण्डी ३.१२०

दण्डी हेतुसूक्ष्मलेशालङ्कारान्[१] वाण्या उत्तमभूषणानि कथयति। परं भामहस्तु एतानलङ्कारानेव न स्वीक[२]रोति। एतया समालोचनया भामहः परवर्ती सिध्यति। दण्डी च उपमादोषांश्चतुरः भामहान्नैव गृहीतवान्। यतो हि भामहोऽपि मेधाविनः सप्त उपमादोषान् स्वीकृतवान्। अतो द्वयोरेव आधारः मेधावी एव। एवं च दण्डिनः महाकाव्यवर्णनं भामहावलम्बितं न। दण्डिनः वाङ्मयस्य स्वभावोक्तिवक्रोक्ति भागयोर्विभाजनमपि भामहस्य—

युक्तं वक्रस्वभावोक्त्या सर्वमेवैतदिष्यते।[३] एतेन प्रेरितं नास्ति यतो भामह एतयोरलङ्कारत्वमेव न मन्यते।

काव्यालङ्कारे भामहः पूर्ववर्तिनामाचार्याणां नामनिर्देशं विनैव कतिपयान् सिद्धान्तान् परिभाषते। यथा—

स्वभावोक्तिरलङ्कार इति केचित् प्रचक्षते।
अर्थस्य तदवस्थत्वं स्वभावोऽभिहितो यथा॥[४]

दण्डी च इममेवालङ्कारं स्पष्टतः चित्रयति—यथा—

नानावस्थं पदार्थानां रूपं साक्षाद् विवृण्वती।
स्वभावोक्तिश्च जातिश्चेत्याद्या साऽलङ्कृतिर्यथा॥[५]

अनेन पुनः प्रश्नोऽयं समुद्भवति दण्डिभामहयोः कः पूर्वः ? कः परः ?

भामहः स्वकीयमलङ्कारनिरूपणं विधाय अतिरिक्तान् त्रयोविंशत्यलङ्कारान् निरूपयति, ते सर्वे चालङ्काराः समानकारिकाणां माध्यमेनैव दण्डिना काव्यादर्शे निरूपिताः। एतेन च दण्डिनः भामहपूर्ववर्त्तित्वंसिध्यति।

---

१ हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम्। काव्यदर्शः—२.२३५

२ हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारतया मतः। काव्यालङ्कारः-२८६

३ काव्यालङ्कारः-भामहः-१.३०

४ तत्रैव २-९३

५ काव्यादर्शः, दण्डी २-८

अन्यत्र च भामहस्य दण्डिपूर्ववर्त्तित्वहेतुना निर्दिश्यते-भामहः उपमारूपकं, ससन्देहं, अनन्वयम्, उत्प्रेक्षावयवं च स्वतन्त्रालङ्काररूपेण स्वीकरोति[1] परं दण्डी उपमारूपकं रूपके, संसन्देहं, अनन्वयं च उपमायां, उत्प्रेक्षावयवं चोत्प्रेक्षायां समावेशयन्नपि स्वतन्त्रालङ्कारत्वेन स्वीकरोति। परं नैतत्समीचीनं यतो हि दण्डी अनन्योपमां नैव निर्दिशति यस्याः समावेश स उपमायां विदधाति।

भामहः कतिपयासूक्तिषु काँश्चिदाचार्यान् सव्यङ्ग्यं सुधी-सुमेधान्महात्मशब्दैश्च निर्दिशति, किं बहुना यदा-कदा तान् प्रति 'अमेधा' शब्दप्रयोगमपि प्रयुंक्ते। परं तेषु तेषु आचार्येषु दण्डिन उल्लेखो नैव।

दण्डी महाकाव्येषु शत्रोर्विजेतुर्नायकस्याभ्युदयवर्णनं, तत्परातिशायिपराक्रमवर्णनं वाऽनिवार्यं मन्यते[2]। परं भामहस्तु नायकोत्कर्षवर्णनमाक्षिपति[3]। परस्परं प्रयुक्तानां शब्दानां साम्यत्वेन भामहोऽत्र दण्डिनमेवाक्षिपति। अन्यत्रापि

मार्गविभागे भामहो दण्डिनमाक्षिपति। तद्यथा—दण्डी काव्यवाण्याः सूक्ष्मभेदान् निर्दिशन् वैदर्भगौड़ीयमार्गौ प्रस्फुटान्तरौ सूचयन् वैदर्भं श्रेष्ठं

---

१ काव्यालङ्कारः ३.३५-६, ४३८

२ गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः॥
वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि।
तज्जयान्नायकोत्कर्ष र्णनं च धिनोति नः॥
काव्यादर्शः १-२१,२२

३ नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः।
न तस्यैव वधं ब्रूयादन्योत्कर्षाभिधित्सया॥
यदि काव्यशरीरस्य न स व्यापितयेष्यते।
न चाभ्युदयभाक् तस्य मुधादौ ग्रहणं स्तवे॥
काव्यालङ्कारः१-२२,२३

मार्गं स्वीकरोति। तमेतं प्रकारं खण्डयन् भामहः कथयति—गतानुगतिकतयाऽमेधसो जना एवं वक्तुं क्रमन्ते।[१]

एतादृशाः खण्डनक्रमा बहवः। परं तैः खण्डनप्रकारैः निस्सन्दिग्धमिदं कथयितुं न पार्य ते, कोऽस्ति पूर्वः, कश्चापरः गद्यपरिभाषायामपि भामहदण्डिनोर्मतवैभिन्र्यं दृश्यते। दण्डी-गद्यपरिभाषां परिभाषते—

ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्[२]।

भामहः एतां परिभाषामपवदन् कथयति—

केचिदोजोऽभिधित्सन्तः समस्यन्ति बहून्यपि।
यथा मन्दारकुसुमरेणुपिञ्जरितालका॥[३]

ज्ञापकहेत्वलङ्कारवर्णनेऽपि एतयोर्भिन्नतैव। दण्डी ज्ञापकहेतुमुदाहरति—

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।
इतीदमपि साध्वेव कालावस्थानिवेदने॥[४]

परं भामह एतदुदाहरणमनुचितं मन्वानः केवलमेतं वार्त्तारूपिणमेव प्रकटयति।—

---

१ वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे।
तदेव च किल ज्यायः सदर्थमपि नापरम्॥
गौड़ीयमिदमेतत्तु वैदर्भमिति किं पृथक् ?
गतानुगतिकन्यायान्नाख्येयममेधसाम्॥
काव्यालङ्कारः—१-३१,३२

२ काव्यादर्शः—१-८०

३ काव्यालङ्कारः—२.२

४ काव्यादर्शः—२.२४४

इत्येवमादि किं काव्यं वार्त्तामेनां प्रचक्षते।

एतादृशस्थलेषु समीक्षकाः परम्परया प्राप्तमिदं मतवैविध्यं द्वयोरेवाचार्ययोः स्वकीयमत्प्रतिपादनमपि घोषयन्ति

दोषसमुद्देशेऽपि द्वाचार्यौ परस्परं नाभिमतौ।

दण्डी पूर्वं दशदोषवर्णनं विधायैकादशं दोषं प्रतिज्ञा-हेतु-दृष्टान्तहानिं नाभिमन्यते। केवलं चर्चामात्ररूपेणैव वर्णयति।[१]

भामहस्तु पञ्चमाध्याये प्रतिज्ञाहेतुदृष्टान्तहानिं दोषं निरूप्य तं सर्वाधिकमहत्वपूर्णमुद्घोषयति।[२]

अत्र हि भामहस्य—

प्रथमालीढमधवः पिबन्ति कटु भेषजम्।

दण्डिनः तत्सम्बन्धे कथितस्य—

विचारः कर्कशप्रायस्तेनालीढेन कि फलम्।

प्रतिक्रियावचनमपि भवितुमर्हति।

एवं दोषनिदर्शनेऽलङ्कारनिरूपणे, कथाख्यायिकयोर्लक्षणे तु द्वयोरेवाचार्ययोः मतविपरीतत्वं, प्रतिक्रियात्वं, आक्षेपदर्शनं वाऽस्ति, युगपदेव काव्यहेतुप्रतिपादनेऽपि विचारवैविध्यं दृश्यते।

भामहः काव्यहेतुषु प्रतिभायाः स्वरूपं जन्मजातमेव प्रतिपादयति—

---

१ काव्यादर्श-३-१२७

२ प्रायेण दुर्बोधतया शास्त्राद् विभ्यत्यमेधसः।
तदुपच्छन्दनायैष हेतुन्यायलवोच्चयः॥
स्वादुकाव्यरसोन्मिश्रशास्त्रमप्युपयुञ्जते।
प्रथमालीढमधवः पिबन्ति कटु भेषजम्॥
काव्यालङ्कारः— ५-२, ३

गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्।
काव्यं तु जायते जातु कस्याचित् प्रतिभावतः॥[1]

दण्डी च स्वाभाविक्या प्रतिभया सह काव्यशास्त्राध्ययनं, अभ्यासरूपिणं प्रयत्नं च काव्यसिद्धिपरं लक्षयति—

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥
न विद्यते यद्यपि पूर्ववासनागुणानुबन्धिप्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्॥[2]

जे. नोबेलमहोदयो दण्डिनः काव्यपरिभाषां, काव्यरूपाणां वर्गीकरणं, महाकाव्यलक्षणं, मार्गसिद्धान्तनिरूपणम्, अलङ्काराणां निरूपणं च भामहात्सुस्पष्टतरं मन्यते।[3] कामं काव्यशास्त्रसम्प्रदायेषु भामहस्य काव्यलक्षणम्[4]-दण्डिनः काव्यलक्षणा[5]देधिकतरं प्रचलितमभवत्, तथापि विषयनिरूपणस्य क्रमबद्धा योजना, सविस्तरं निरूपणं च दण्डिनः शैल्या निजौ गुणावेव।

प्रो. ए. शंकरन् महोदयः भोजस्य श्रृङ्गारप्रकाशे समागतं श्लोका[6] मिमं समुद्धृत्य भामहं दण्डिपूर्ववर्त्तिनं दर्शयति। तस्यैवानुसारं च श्लोकस्योत्तरार्द्धः काव्यादर्शे[7] प्राप्यते। परं श्लोकस्यास्य पूर्वार्द्धस्य

---

१ भामहः-काव्यालङ्कारः—१-५
२ दण्डी-काव्यादर्शः—१-१०३,१०४
३ संस्कृतकाव्यशास्त्रस्येतिहासः पी.बी.क़ाणे पृ.७८,७९
४ शब्दार्थौ सहितौ काव्यम्-काव्यालङ्कारः— १-१६
५ शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली। काव्यादर्शः— १-१०
६ वक्रत्वमेव काव्यानां परा भूषेति भामहः।
श्लेषः पुष्णाति सर्वासु प्रायो वक्रोक्तिषु श्रियम्॥
श्रृङ्गारप्रकाशः पृ.४३८
७ काव्यादर्शः—२.३६३

दण्डिकृतकाव्यादर्शेऽलभ्यत्वात् मतमेतत् प्रामाणिकतां नार्हति। यतो हि भोजस्तु दण्डिनः पद्यस्यार्धं कस्याप्यन्यलेखकस्य पद्यार्धेन सहैवं दर्शयति।[१]

भामहः काव्यालङ्कारे न्यासकारोल्लेखं करोति। जिनेन्द्र-बुद्धिरेव न्यासकारः आसीत्। तस्य च समयः ख्रिस्ताब्दस्य सप्तमशताब्दी अस्ति। केचित् समालोचकाः कस्यापि प्रचीनतरस्य न्यासकारस्योल्लेखं मन्वते। बौद्धदार्शनिकः शान्तरक्षितः सप्तमाष्टमशताब्दीमध्ये वर्तमानः स्वतत्त्वसङ्ग्रहे[२] अपोहवादालोचकान् भामहस्य त्रीन् श्लोकान् समुद्धरति। अनेन च भामहस्य कालोऽष्टमशताब्द्या द्वितीयचरणः स्वीक्रियते। दण्डी चास्यानुसारं भामहतः पूर्ववर्त्ती एव।

निष्कर्षः— दण्डिभामहयोः समये शताब्द्यन्तापेक्षया दशकान्तर एव सिध्यति। काव्यादर्शे[३] संख्यातप्रहेलिकाया लक्षणमेवं क्रियते—

नासिक्यमध्या परितश्चतुर्वर्णविभूषिता।
अस्ति काचित्पुरी यस्यामष्टवर्णाह्वया नृपाः॥

अस्य पद्यस्यांशः, सम्पूर्णपद्यं वा पल्लवनरेशस्य महेन्द्र-वर्मप्रथमस्य मामन्दूराभिलेखे समुपलभ्यते[४]। अतः दण्डिनः कालः काञ्च्याः पल्लववांशिनां राज्ञां राज्यकाल आसीत्। काव्यादर्शे शिवस्यानन्योपासकस्य राजवर्मणो नामकस्योल्लेखः प्राप्यते। एष राजवर्मा राजसिंह-राजसुन्दरवर्मोपाधिधारिणो नरसिंहवर्मद्वितीयादभिन्नः। यस्य कालः ६८०, ६९६ तमात् ख्रिस्ताब्दाद्वाऽऽरभ्य ७२२ तमं यावदस्ति। अस्यैव राज्ञः कालकाल उपाधिरप्यासीद्, यस्योल्लेखः काव्यादर्शे—चतुष्पादगते,

---

१ श्लेषः पुष्णाति सर्वासु प्रायो वक्रोक्तिषु श्रियम्।
वाकोवाक्येन हयन्ति मनांसि कृपतामपि॥
श्रृङ्गारप्रकाशः— पृ.२८९

२ तत्त्वसंग्रहः—श्लोकः ६१२-६१४

३ काव्यादर्शः— ३-११४

४ हिस्ट्री ऑफ संस्कृत लिट्रेचर, ऐम.कृष्णमाचारी पृ.४५५

अव्यपेत-व्यपेतात्मके आदिमध्यान्तयमकस्योदाहरणे विद्यते[१]। अतो दण्डिनः कालः सप्तमशताब्धा अन्तिमो भागोऽष्टमशताब्द्या आरम्भ एव। पूर्वोद्धृतो विज्जिकाश्लोकोऽपि मतमिदं पुष्णाति।

अवन्तिसुन्दरीकथायाः प्रस्तावनायां कतिपयेषां लेखकानां सार्थकोल्लेखः क्रियते। अत्रेदमैतिह्यवर्णनं वर्ण्यते—

दण्डिनः प्रपितामहो दामोदरस्वामी, महाकवि-भारविद्वारा चालुक्यराजपुत्रेण विष्णुवर्धनेन सह संपर्कं स्थापितवान्, मैत्रीं च कृतवान्। किंचित्कालान्तरं दामोदरस्वामी गङ्गवंशिनो राज्ञो दुर्विनीतस्य राजसभां प्राप्तः। तदैव पल्लवराजः सिंहविष्णुः तत्प्रतिभाज्ञानं श्रुत्वा तं स्वराजसभायामाहूतवान्। अत्र यो भारविर्वर्णितः स निश्चितरूपेण किरातार्जुनीयस्य लेखको भारविरेव। यस्य कालः ६३४ तम खिस्ताब्दकालीनः[२]

पूर्वोद्धृतस्य गङ्गवंशिन राज्ञो दुर्विनीतस्य राज्यं मैसूरनगरे (कर्णाटक प्रदेशे) ५४० तमात् खिस्ताब्दात् ६०० तमं खिस्ताब्दं यावदासीत्। संस्कृतकन्नडभाषयोः विद्वान् नृप एष कवीनामाश्रय आसीत्। काञ्चीपुरस्य सिंहविष्णोः राज्यकालः ५७५ ई. तमात् ६०० ई. तमं यावदासीत्। एष पल्लववंशस्य प्रथमः प्रख्यातो राजाऽऽसीत्।

एवं सिंहविष्णोः विष्णुवर्धनस्य च राज्यकालः सम एव। दामोदरस्वामी विष्णुवर्धनसामीप्यं विहाय दुर्विनीतसभां प्राप्तः। ततश्च काञ्चीपुरं गतः। काञ्चीपुरे दामोदरस्वामिनः त्रयः सूनवः समुत्पन्नाः। १-सिंहविष्णुः २-मनोरथः ३-अतिलोभश्च। मनोरथस्य चत्वारः सुताः प्रादुर्बभूवुः— १-दामो-

---

१ कालकालगलकालकालमुखकालकाल— कालकालघनकालकालपन काल काल। कालकालसितकालका ललनिकालकाल— कालकालगतु कालकाल कलिकालकाल॥

२ स विजयतां रविकीर्तिः कविताश्रित कालिदास भारविकीर्तिः—६३४ तमे खिस्ताब्दे ऐहोलाशिलालेखे समुद्धृतं पद्यम्।

दरः २-भवदासः, ३-सिंहविष्णुः ४-वीरदत्तश्च। दण्डी च वीरदत्तस्यानेकानां कन्यानामनन्तरमुत्पन्नः कनिष्ठः पुत्र आसीत्[1]।

अतो दण्डी दाक्षिणात्य आचार्यो गद्यकारश्च। यदि वंशक्रमस्यान्तरो विंशतिवर्षीयः स्वीक्रियेत तर्हि दण्डिनः कालः सप्तमशताब्धाः अन्तिमश्चरण एव।

---

१ मनोरथाह्वयस्तेषां मध्यमो वंशवर्द्धनः।
ततस्तनूजाश्चत्वारः स्रष्टुर्वेदा इवाभवन्॥
श्रीवीरदत्त इत्येषां मध्यमो वंशवर्द्धनः।
यवीयानस्य च श्लाघ्या गौरी नामाभवत्प्रिया॥
ततः कथंचित्सा गौरी द्विजाधिपशिरोमणेः।
कुमारं दण्डिनामानं व्यक्तशक्तिमजीजनत्॥
इण्डियन् ऐंटीक्वेरी-५-६७-७१

IV

आचार्य दण्डिनो व्यक्तिगतपरिचयः

आचार्यदण्डिनः सम्बन्धे प्रचलितानां किंवदन्तीनामनुसारं एतस्य कवित्वं गौरवपूर्णं ख्यातियुक्तं चाभूत्। विविधाः प्रशंसोक्तयः कालिदासभवभूतिभ्यां सहाप्यस्य सम्बन्धं सूचयन्ति। विशेषतः प्रख्यातोक्तिरस्ति—

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥

अवन्तिसुन्दरीकथायाः प्रस्तावनायां दण्डिनः परिचय एवं निर्दिष्टः। एष कुशिकगोत्रीयो द्विजः सामान्यतः सौराष्ट्रप्रान्ते संजातः[१]। परमवन्तिसुन्दरीकथायाः प्रस्तावनायां मूलपाठानुसारेणायं पञ्चनदप्रान्तार्गतानन्दपुरवासी

---

१ 'सोसाइटी एंड कल्चर इन दि टाईम ऑफ दण्डिन्' धर्मेन्द्र कुमार गुप्त पृ. १९

सिध्यति। तत्र हि यः पाठः समुपलभ्यते तेन तस्य वास्तविकः परिचयो ज्ञास्यते। स हि ग्रन्थोऽनेनैव लिखितः। तत्रत्यः पाठः एवं निर्दिष्टः[१]।

अचलपुरे नारायणस्वामिनो गृहे दण्डिनः प्रपितामहो दामोदरस्वामी जन्म लेभे। पूर्वप्रदत्तघटनाक्रमानुसारेण दामोदरस्वामी स्वकवित्वस्याश्रयदातारमन्विच्छन् भ्रमन्नितस्ततोऽन्ततः काञ्चीपुरं समाश्रितः। ततो दामोदरस्वामिनः मनोरथः सूनुः सञ्जातः, मनोरथाद् वीरदत्तः। वीरदत्तस्य भार्या गौरी दण्डिनामानं सुतमसूत्।

दण्डिनो जन्म ६६५ खिस्ताब्दस्य निकटे मन्यते। सप्तवर्षीये सत्येवास्मिन् जननी स्वर्गमगात्। उपनयनसंस्कारानन्तरं दण्डी वेदाध्ययनमारभत। काले विद्याध्ययनयुक्तेऽस्य जनकोऽपि भुवं त्यक्त्वा देवेषु परिगणितः। काञ्च्यां चालुक्य-वंशीयः विक्रमादित्यः प्रथमः पल्लवराज्य आचक्रमे। दण्डी च काञ्चीं त्यक्तुं विवशतां गतः। इतस्ततो भ्रमन् गुरुकुलेषु विद्यामधीत्य पुनः काञ्ची सम्प्राप्तः। अधुना काञ्च्यां परमेश्वरवर्मणः प्रथमस्य राज्यकालः, तत्पुत्रस्य नरसिंहवर्मद्वितीयस्य वा शासनकालोऽविद्यत।

काञ्च्यां पल्लवराजस्य राजसभायां दण्डी यदा राजकविरभूत् तदैवानेन शास्त्रग्रन्थः काव्यादर्शः, गद्यकाव्यं दशकुमारचरितम्, अवन्तिसुन्दरी कथा च लिखिता। वस्तुतः स्वजीवनकाल एव दण्डी विमलं यशः सम्मानं च लेभे। एष कवित्वे काव्यशास्त्रित्वेन च विख्यातः कलासमीक्षको विद्वान् मित्रमण्डलीमेकां स्थापितवान्। यस्यां केरलस्याचार्यकविर्मातृदत्तः, देवशर्मा, जयन्तो, नारायणो, भजनानन्दो, विमतः चोलदेशीयो रामशर्मा च सम्मिलितः[२]।

---

१ अस्ति दिशि पश्चिमोत्तरस्यामार्यदेशशिखामणिरानन्दपुरं नाम ब्राह्मणानां महानावासः। ततो हि निःसृता सरस्वतीव ब्रह्मलोकाद् दक्षिणां दिशमनुगृह्णती— अचलपुरं नाम—नासिक्यभूमौ नगरम् अधिवसति कुशिकवंशवर्धनी सर्वातिथिरप्रतिग्रहीत्री महत्युदाररूपा ब्रह्मराशिर्ब्रह्मसंततिः। अवन्तिसुन्दरी कथा-पृ.९

२ अवन्तिसुन्दरीकथा पृ.१२-७

व्यावहारिकजीवनमस्य कुतूहलचित्तवृत्तिपूर्णं साहसिकवृत्तिसंयुक्तमासीत्। एष वाग्विदग्धः सहृदयो नागरिकः सम्पूर्णभारतस्य परिभ्रमणं कुर्वन् लोकरीतिनिष्णातः, कल्पनामर्मज्ञः, स्वरचनासु स्वविशालानुभवस्य चित्रणं विविध-वर्णवर्णितकलाभिर्व्यधात्।

इदमत्रावधेयं यद् भोजप्रबन्धे लिखितस्य दण्डिनः चरितस्य (जीवनस्यवा) ऐतिह्यं महत्त्वं नास्ति। यत्र हि लिखितं यद् दण्डी अपि भोजस्य राजसभायां स्थानं लेभे। प्रो.विल्सन महोदयोऽस्य पुष्टिं व्यधात्। अत्रेदं चित्रितं यत् समस्यापुराणे भवभूतिदण्डिकालिदासाः प्रथमं पंक्तिमरचयन् ततश्च भोजः तस्यान्तिमं चरणं पूरयामास—यथा

अरुणकिरणजालैरन्तरिक्षे गतर्क्षे (भवभूतिः)

चलति शिशिरवाते मन्दमन्दं प्रभाते। (दण्डी)

युवतिजनकदम्बे चन्द्रबिम्बं ललम्बे॥ (भोजः)

एतादृश एव घटनाक्रमोऽन्यत्र चित्र्यते। एकदा दण्डिकालिदासयोः प्रतिस्पर्धा स्पर्धिता। तदैव सरस्वती तयोः श्रेयसः प्रकटनार्थमूचे—

कविर्दण्डी, कविर्दण्डी, कविर्दण्डी न संशयः

तदा क्रुद्धः कालिदासः तामुवाच—"कासि त्वम् ?" तदा सरस्वत्युवाच "तवैवात्माऽहम्"। कालिदासः पुनः पृष्टवान्-"कोऽहं ब्रूहि तदा मूढे ?" सरस्वती उदतीतरत् "त्वमेवाहं न संशयः"।

एतादृश्यो घटनाः केवलं पण्डितैः कृता कवीनां स्तुतयः। नैतासां किमपप्यैतिहासिकं मूत्त्वम्। एतादृश्येव कल्पना दण्डिनो नामविषयेऽपि कृता। दण्डिनोऽर्थः संन्यासी भवति। केचित्कथयन्ति यौवनविलासान् भुक्त्वैष यदा विरक्ततामभजत् तदाऽयं दण्डिनाम्ना ख्यातिमगात्। वास्तविकं नामास्य किमासीत् ? न तेन कोऽपि परिचितः। प्रो.विल्सनमहोदयोऽपि विचारमेनमनुवर्तते। परं सत्यतां नैवार्हति एष प्रसङ्गः। यतो हि दन्तकथानामेवानुकरणेन कदापि न निर्णीयतऽपि त्वन्तः साक्ष्यस्याधारेणैव धारणा निर्धार्यन्ते।[१]

V

संस्कृतकाव्यशास्त्रपरम्परायां दण्डिनः स्थानम्

संस्कृतकाव्यशास्त्रपरम्परायां प्रसिद्धिरूपेण तु भरतमुनिरेवाद्य आचार्यः। परं भरतेनापि स्वनाट्यशास्त्रे तण्डु-शाण्डिल्य-वात्स्य-कोहल-दन्तिल-बादरायण-काश्यप-नन्दिस्वामि-वररूचीनामुल्लेखः कृतः। एषु काश्यप-नन्दिस्वामि वररूचीनामुल्लेखोऽन्यत्रापि प्राप्यते। एतेषु कस्य क्षेत्रं नाट्यशास्त्रं कस्य च काव्यशास्त्रमिति स्पष्टं न कथ्यते।

भारतीयकाव्यशास्त्रपरम्परायां प्रथमे ग्रन्थे नाट्यशास्त्रे सप्तदशाध्याये काव्यशास्त्रीयसिद्धान्तानां निरूपणं विद्यते। अत्रैव दशानां काव्यगुणानां, दशानां काव्यदोषाणां, षट्त्रिंशत्काव्यलक्षणानां चतुर्णामलङ्काराणां च निरूपणं

८ ऐम.आर.काले, दशकुमारचरितभूमिका पृ.१३,१४

कृतम्। अत्र निरूपितानां दशानां काव्यगुणानां नामानि तान्येव सन्ति यानि दण्डिना काव्यादर्शे वर्णितानि।

भरतेन ये चत्वारोऽलङ्कारा निर्दिष्टाः ते सन्ति उपमा, रूपकं, दीपकं यमकश्च। उपमायाः पुनः पञ्च भेदाः। तेषु निन्दोपमा, प्रशंसोपमा च दण्डिना स्वीकृतौ। यथा—

पद्मं बहुरजश्चन्द्रः क्षयी ताभ्यां तवाननम्।
समानमपपि सोत्सेकमिति निन्दोपमा स्मृता॥

काव्यादर्शः—२-३०

ब्रह्मणोऽप्युद्भवः पद्मं चन्द्रः शम्भुशिरो धृतः।
तौ तुल्यौ त्वन्मुखमेति सा प्रशंसोपमेष्यते॥

तत्रैव, २-३१

यमकालंकारस्य दशभेदेषु दण्डिना नामतः केचित्स्वीकृताः। भरतस्य काव्यतत्त्वनिरूपणं हि नाटकस्य रसनिष्पत्तौ साहाय्यत्वेनैव विहितम्।

दण्डिनो भरतकालादनन्तरं प्रादुर्भावः बहुकालानन्तरं सञ्जातः। भरतदण्डिनोर्मध्ये के विद्वांस आचार्या वा काव्य-शास्त्रीयसिद्धान्तानां प्रतिपादनं कुर्वाणा आसन् तेषामुल्लेखः कुत्रापि न प्राप्यते। येषां ग्रन्थानामुल्लेखोऽस्ति तेषु प्रथमो विष्णुधर्मोत्तरपुराणम् अस्ति। अस्य तृतीयकाण्डस्य त्रिषु अध्यायेषु यदि काव्यशास्त्रीयसिद्धान्तप्रतिपादनं तर्हि चतुर्दशेऽध्याये सप्तदशालंकाराणां लक्षणानि लक्षितानि। एतेषु सप्त्दशसु अलङ्कारेषु व्याजोक्तिप्रकारमुपन्यासनाकमलङ्कारं विहाय सर्वेऽलङ्काराः दण्डिना काव्यादर्शे निरूपिताः।

पञ्चमशताब्द्या अन्तिमे चरणे भट्टिकविना रावण-वधस्य दशमे सर्गेऽष्टत्रिशानामलङ्काराणां निरूपणं विद्यते। एतेषु निपुणं वार्त्तालङ्कारं च विहाय सर्वेऽलङ्कारा दण्डिना निरूपिताः। दण्डी तु वार्त्तालङ्कारस्य स्थाने स्वभावोक्त्यलङ्कारं विवृणोति। भट्टिहि सर्ग एकादशे माधुर्यगुणस्य, द्वादशे च भाविकालङ्कारस्य परिभाषां परिभाषितवान्, दण्डिना तयोरपि ग्रहणं कृतम्। एक ईदृश आचार्यो यस्य रचना नोपलभ्यते, स मेघावी, मेघावि-

रुद्रो वाऽस्ति। भामहः काव्यालङ्कारे उपमादोषप्रसङ्गे[१], यथासंख्यालङ्कारे[२] च मेधाविनः परिचयं ददाति। एवं च काव्यादर्शटीकायां रत्नश्रीज्ञानः[३], नमिसाधुः च रुद्रटस्य काव्यालङ्कारस्य टीकायां[४], राजशेखरस्य काव्य[५]मीमांसायां मेधाविनो, मेधाविरुद्रस्य वा कविरूपेणोल्लेखो लभ्यते।

अवन्तिसुन्दरीकथायां दण्डिनो मित्रेषु रामशर्मणो वर्णनं वर्ण्यते। भामह एनम् अच्युतोत्त[६]रनामकस्य प्रहेलिकाग्रन्थस्यालेखकरूपेरत्नश्रीज्ञानः काव्यादर्शटीकायां[७], संघरक्षितश्च पाल्यलंकारग्रन्थे सुबोधालङ्कारे नाम्ना निर्दिशति।

काव्यादर्शस्य टीकाकारो वादिजङ्घालो दशमशताब्द्या उत्तरार्धे दण्डिपूर्ववर्तिलेखकं कमपि ब्रह्मदत्तनामानं वर्णयति। उपर्युक्तवर्णनेन सुस्पष्टमिदं जायते यत्सर्वेषामेषां भरत-प्रभृतिब्रह्मदत्तान्तानां काव्यशास्त्रसिद्धान्तप्रतिपादकानामाचार्याणां प्रभावो दण्ड्युपरि लक्ष्यते। इदमपि वक्तुं शक्यते यदाचार्यो . दण्डी सर्वेषामेषामाचार्याणां परम्परामनुवर्धयन् स्वकीयं काव्यादर्शनामकं ग्रन्थं विरचयामास।

संस्कृतकाव्यशास्त्रपरम्परायां काव्यादर्शस्य स्थानम्

काव्यादर्शस्य प्रकाशनं भारते पाश्चात्त्यदेशेषु चानेकवारं सञ्जातम्।

१. रत्नश्रीज्ञानस्य रत्नश्रीटीकया सह दशमशताब्द्यां ९३१ तमेऽब्दे प्रकाशितः। एष सिंहलस्य बौद्धभिक्षुः गौड़मगधप्रान्तयोः राज्ञो राज्यपालस्य राज्यारम्भात्त्रयोविंशतितमे वर्षे भारतेऽस्य टीकामकरोत्। एष स्वटीकायां

---

१ काव्यालङ्कारः, भामहः २-४०
२ तत्रैव २-८८
३ काव्यादर्शः-दण्डी २-२
४ काव्यालङ्कारः, रूद्रटः १-२,२-२
५ काव्यमीमांसा
६ काव्यालङ्कारः, भामहः—२-१९
७ काव्यालङ्कारः, भामहः—२-७

भरत-अश्वघोष-गुणाढ्य-वात्स्यायन-कालिदास-प्रवरसेन-मातृचेट-आर्यशूर-काहल-रामशर्म-मेधाविरुद्र-श्यामवादि-कम्बल-हरिवृद्ध-धर्मकीर्ति-भारवि-बाण-भामह-भर्तृमेण्ठानां नाम्नोल्लेखमकुरुत। अस्यां टीकायां ध्वन्यालोकस्यैकस्याः[१] कारिकायाः काव्यादर्शे[२] प्रसंगतो व्याख्यानं कृतम्।

काव्यादर्शस्य रत्नश्री टीकायाः स्वरूपम्

काव्यादर्शस्य टीकासु रत्नश्रीनाम्नी टीकाऽतीव प्राचीना। मिथिला विद्यापीठप्रधानेनेयं १८७९ तमे शकाब्दे प्रकाशिता। सम्पादकेन विषयेऽस्याः लिख्यते-वर्तते भोटदेशे दण्डिग्रन्थस्य भूयान् प्रचारः। कलिकाताविश्वविद्यालयत भोटभाषानुवादसहितः संस्कृतपाठः प्रकाशितः। रत्नश्रीज्ञानस्य टीकायां गौड़मगधप्रचलितः पाठः प्रधानतया स्वीकृतः।

दण्डिकृतस्थालंकारग्रन्थस्य काव्यादर्श इति नामधेयमर्वाचीनमातृकासु टीकासु, मुद्रितग्रन्थेषु प्रचलितम्, परं रत्नश्रीज्ञानस्तु नामधेयमस्य काव्यलक्षणमेव स्वीकरोति यतो हि दण्डी स्वयं लिखति।[३]। लक्षणकारः कुन्तकश्चापि नामैतदेव निर्दिशति।

रत्नश्रीज्ञानः सिंहलदेशाभिजनः सिंहलद्वीपं दक्षिणसागरं समन्तकूटं च निर्दिशति। कस्यापि स्वमित्रस्य यशः कीर्तेरपि नाम समुल्लिखति। ऐतिहासिकानां मतेन पालमहीपतीनां राज्ये विक्रमशीलादिषु महाविहारेषु सैन्धवाःभिक्षवः प्रबलाः आसन्। तेषां श्रीज्ञानरूपणे ख्यातिरासीत्।

रत्नश्रीज्ञानोऽपि सिंहलदेशाद् भारते सम्प्राप्तः सन् केनचित् विविधगुणविभूषितेन सामन्तचूड़ामणिना तुङ्गेन सम्मानितः। ग्रन्थस्यास्य रचना च

---

१ ध्वन्यालोकः—आनन्दवर्धनः १-१३

२ काव्यादर्शः—दण्डी २-२०५

३ **पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च।**
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम्॥
काव्यादर्शः—१-२

पालमहीपतेः त्रयोविंशतितमे राज्यसंवत्सरे कृता। रत्नश्रीज्ञानो बौद्धशास्त्रेषु तदितरशास्त्रेषु च प्रवीणः।

संभाव्यते यत् सिंहलदेशे दण्डिकृतस्य ग्रन्थस्य प्रचार आसीत्। सिंहलभाषानिबद्धः कश्चित् स्वभाषालङ्कारग्रन्थो दण्डिकृतं काव्यलक्षणमाश्रित्य लिखितः। सुबोधालङ्कारकारकेण दण्डिनः सम्बन्धः सूचितः, अतः रत्नश्रीज्ञानः सिंहलदेशे काव्यलक्षणमधीत्य मगधेषु विविधशास्त्रपरिशीलनपूर्वकं तस्य टीकामलिखत्।

अत्रत्या श्लोकव्याख्या सरला, पाण्डित्यपूर्णा च। व्याकरण-तर्क-अलङ्कार-कामशास्त्रादीनां यत्र तत्र प्रयोगः कृतः। महापण्डितो रत्नश्रीज्ञानः स्वकीयानि नवीनानि उदाहरणानि रचयामास। किं बहुना दण्डिकृतेषु श्लोकेषु दोषप्रदर्शनपूर्वकं पादपारिवर्तनमपि कृतवान्। अलङ्काराणां परस्परं भेददर्शनिऽस्य सूक्ष्मे[१]क्षिका समादरणीया मुख्यतः रत्नश्रीज्ञातो मार्गविभागाख्यं प्रथयं परिच्छेदं व्याख्यातवान्।

रत्नश्रियः काव्यपप्रीतिर्विशिष्टा। बहुभ्यो ग्रन्थान्तरेभ्योऽयमुदाहरणानि समकलयत्। अत्र मुख्यतो येषां काव्यशास्त्राणामाश्रयो गृहीतः, तेषु प्रधानानि सन्ति-कोहलकृतं भारतीयनाट्यशास्त्रं, रामशर्मणोऽलङ्कारग्रन्थः, भामहस्य काव्यालङ्कारः, आनन्दवर्धनस्य च ध्वन्यालोकः। बौद्धकविषु अश्वघोष-आर्यशूर-मातृचेटकम्बलाचार्याणामुल्लेखः। कालिदास-भारवि-मेण्ठ-माघा-

---

१ एवं लक्षणम् अलङ्कारत्रयम् आवृत्तिविशेषात्मकमिष्टं दीपकस्य स्थाने विषये एव नान्यत्र। दीपकेनापि तादृशार्थ-प्रतीतिसम्भवात् नार्थतः तयोः भेद इति दीपकस्थान एवेष्टमित्युक्तम्। अन्ये त्वेकेत्र दीपकस्थान इति विशेषेण व्याचक्षते तदसारम्। एवं हि अर्थावृत्तिरेव दीपकस्थाने स्यात्, न शेषमावृत्तिद्वयम्। आवृत्तित्रयमपि च दीपकस्थान इत्युक्तं शास्त्रकृता दीपकस्थान एवेष्टमलङ्कारत्रयमिति साक्षादभिधानात्। ततः शास्त्रविरूरुद्धमेव व्याख्यानम्—उभयमपीष्टं शिष्टैरित्यलमतिविमर्देन। काव्यलक्षणम्-दरभङ्गातः १९५७ तमे खिष्टाब्दे प्रकाशितम्-पृ.१०२

दिभिः कविभिरयं भूयान् परिचितः। लीलावतीकथादमयन्तीचम्पवोरपि नाम्नी समुद्धृतेऽनेन।

व्याकरणसूत्ररूपेण यत्रावश्यकता भवति तत्र चान्द्रसूत्राणि समुल्लिखति। परं चान्द्रव्याकरणानुरक्तोऽपि सादरं पाणिनिमपि समुद्दिशति। कामशास्त्रकाररूपेण मल्लनागनाम्ना वात्स्यायनः सूचितः। रत्नश्रीज्ञानः बौद्धन्यायशास्त्राद् धर्मकीर्तिकृतान् प्रमाणवार्त्तिकश्लोकान् न्यायसूत्रवैशेषिकसूत्राणि चानूद्योद्धरति।

१. एवं रत्नश्रीटीका बहुगुणाकारा न सम्पूर्णतोऽस्या मातृका केनापि सम्प्राप्ता। परं परवर्तिटीकाभ्योऽस्या टीकाया बहूपयोग इति तु सुनिश्चितमेव।

२. वादिजङ्घालः, वादिजङ्घलः, वादिजङ्घालभट्टो वा ९६३ तमेऽब्दे काव्यादर्शटीकामरचयत्[1]। एष टीकाकारः काश्यप-ब्रह्मदत्त-नन्दिस्वामि-भामहान् दण्डिपूर्ववर्त्याचार्यान् वर्णयति।

३. अज्ञातकर्तृकस्य हृदयङ्गमा टीका। अस्यां काश्यप-वरुचि-भामहानामेवोल्लेखः। एष टीकाकारः भोजस्य श्रृङ्गारप्रकाशात् सरस्वतीकण्ठाभरणाच्चांशान् गृहीत्वा स्वग्रन्थमरचयत्। अतः समयोऽस्य भोजकालादुत्तरकालीनः एकादशशताब्द्यन्तर्गतो विचार्यते।

४. तरुणवाचस्पतेः टीका। वाचस्पतिपुत्रः केशवभट्टारकः होयसलनरेशरामनाथस्य राज्यगुरुः आसीत्। अस्य राज्यारम्भः १२५५ खिस्ताब्दः। द्वादशशताब्द्या अन्ते, त्रयोदशशताब्द्या आरम्भे वा प्रकाशितायामस्यां टीकायां सरस्वतीकण्ठाभरणाद्दशरूपकाच्च उद्धरणानि संकलितानि।

---

१ 'भण्डारकर ओरियण्टल इन्स्टीट्यूट पूना' अत्र पाण्डुलिपिः। गङ्गवंशीयमारसिंहस्य ताम्रलेखे ९६३ ईस्वीये उल्लेखः।

५. तरुणवाचस्पतिपुत्रः केशवभट्टारकोऽपि काव्यादर्शे टीकामलिखत् परमद्यावधि साऽप्रकाशिता।

६. हरिनाथस्य मार्जना टीकाऽप्यप्रकाशिता। पाण्डुलिपिरस्या भाराडारकरप्राच्यविद्यानुसन्धानकेन्द्रे सुरक्षिता। अस्यां टीकायां षोडशशताब्द्याः केशवमिश्रस्योल्लेखः। अयमेव हरिनाथो भोजसरस्वतीकण्ठाभरणस्यापि मार्जनानाम्नीं टीकामलिखत्।

७. मल्लिनाथस्य वैमल्यविधायिनीटीकापि नैवप्रकाशिता। अस्योल्लेखो विश्वेश्वरभट्टस्यालङ्कारकौस्तुभे कव्यादर्शस्यटीकाकार रूपेणोल्लेखः। समयोऽस्य शतब्द्यष्टादशकालः।

८. त्रिभुवनचन्द्रवादिसिंहस्य नाम्नो जैनकवेरपूर्णाऽप्रकाशिता टीका।

९. त्रिशरणतटभोमस्याप्रकाशिता चन्द्रिका टीका।

१०. गदाधरपुत्रस्य कृष्णशर्मणः च पौत्रस्य नरसिंहसूरेरप्रकाशिता दण्ड्यर्थमुक्तावली टीका।

११. विश्वनाथस्याप्रकाशिता टीका।

१२. भगीरथस्याप्रकाशिता टीका।

३. विजयानन्दस्यापूर्णाऽप्रकाशिता च टीका, लिपिकालः १६२६ ख्रिस्ताब्दः। भाण्डारकप्राच्यविद्यानुसन्धानकेन्द्रे ग्रन्थसंख्या १२, सं. १२३ नाम्नी पाण्डुलिपिः सुरक्षिता।

१४. यामुनस्य यामुनेयस्य वा टीका। काव्यादर्शस्य चतुर्षु परिच्छेदेषु विभाजनम्। पाण्डुलिपिः उपर्युक्तसंख्यायां भा.प्रा.वि.अनुसन्धान केन्द्रे सुरक्षिता।

१५. कृष्णकिंकरतर्कवागीशस्य विवृतिनाम्नी, काव्यतत्त्वविवेकनाम्नी वाऽप्रकाशिता टीका। अस्याः पाण्डुलिपिः इण्डिया आफिस लाईब्रेरी लण्डननगरे सुरक्षिता।

१६. वाचस्पतेः, धर्मवाचस्पतेर्वा टीका। एषा तरुणवाचस्पतेरेव टीका।

१७. वरमादेशे बौद्धविद्वद्भिर्लिखितं टीकात्रयम्। अस्मिन् रत्नश्री-टीकैका सम्भवति।

एताः सर्वाः टीकाः प्राचीनटीकानाम्ना प्रख्याताः। नवीनानां टीकानां निर्देश इत्थं कर्तुं शक्यते।

१. प्रेमचन्द्रतर्कवागीशस्य मालिन्यप्रोञ्छनी टीका कलिकातानगरे १८९३ तमे खिस्ताब्दे प्रकाशिता।

२. जीवानन्दविद्यासागरस्य विवृतिः। १८८२ तमे खिस्ताब्दे कलिकातानगरे प्रकाशिता।

३. नृसिंहदेवशास्त्रिणः कुसुमप्रतिमानाम्री टीका लवपुर—(लाहौर) नगरे १९२५ तमेऽब्दे प्रकाशिता।

४. रङ्गाचार्यशास्त्रिणः प्रभानाम्नी टीका १९३८ तमेऽब्दे पूना नगरे प्रकाशिता।

५. रामचन्द्रमिश्रस्य प्रकाशनाम्नी टीका। १९५८ तमेऽब्दे वाराणस्यां प्रकाशिता।

६. प्रो.धर्मेन्द्र कुमार गुप्तस्य सुदर्शननाम्नी टीका, १९७३ तमेऽब्दे दिल्ली नगरे प्रकाशिता।

एताभ्यः टीकाभ्यो भिन्ना तिब्बती-जर्मनी-अंग्रेज़ी-हिन्दीभाषासु लिखिता काश्चनान्या अपि टीकाःसंभवन्ति। परं तासामप्रकाशित्वात्तासां महत्त्वं नैव। परं एतासां बह्वीनां टीकानां कारणेन सर्वेभ्यः साहित्यशास्त्रपाठकेभ्यः समालोचकेभ्यो वा काव्यादर्श एको महत्त्वपूर्ण उपयोगिग्रन्थो विद्यते। काव्यादेर्श त्रयः परिच्छेदाः सन्ति। रङ्गाचार्यसंस्करणे चत्वारः परिच्छेदाः। यः तृतीयपरिच्छेदोऽन्यसंस्करणेष्वेकः स एव रङ्गाचार्येणद्विभात्रयोर्विभक्तः। मद्रासससंस्करणस्य चतुर्थः परिच्छेदो दोषचर्चया प्रारभ्यते। कलिकातासंस्करणे रंगाचार्य-संस्करणे च ६६० श्लोकाः सन्ति। मद्रासससंस्करणे च ६६३ श्लोकाः सन्ति।

काव्यादर्शस्य त्रयाणां परिच्छेदानां विषया एते सन्ति।

प्रथमे परिच्छेदे—काव्यलक्षणम्, तस्य गद्यपद्यंमिश्रेषु त्रिषु भागेषु विभागः महाकाव्यलक्षणम्, गद्यभेदयोः कथाख्यायिकयोर्निरूपणमस्ति। दण्डिमते च कथाख्यापिकयोर्भेदाभावः। साहित्य-भेदरूपेण संस्कृत प्राकृतापभ्रंशमिश्रभेदानां वर्णनम्, वैदर्भिगौड़ीमार्गनिरूपणम्, दशगुणवर्णनम्, अनुप्रासलक्षणोदाहरणवर्णनम् तथा कवित्वस्यानिवार्याणां गुणानां प्रतिभाश्रुत्यभियोगानां स्वरूपमपि निर्दिष्टम्।

द्वितीयपरिच्छेदे— अलङ्कारलक्षणम्, तस्य पंचत्रिशंद् भेदाश्च निरूपिताः। दण्डिसम्मता अलङ्कारा इमे सन्ति—

स्वभावोक्तिः, उपमा, रूपकम्, दीपकम्, आवृत्तिः, आक्षेपः, अर्थान्तरन्यासः, व्यतिरेकः, विभावना, समासोक्तिः, अतिशयोक्तिः, उत्प्रेक्षा, हेतुः, सूक्ष्मः, लेशः (लवः), यथासंख्यः (क्रमः), प्रेयः, रसवत्, ऊर्जस्वि, पर्यायोक्तम्, समाहितम्, अपह्नुतिः, श्लेषः, विशेषोक्तिः, तुल्ययोगिता, विरोधः, अप्रस्तुतप्रशंसा, व्याजोक्तिः, निदर्शना, सहोक्तिः, परिवृत्तिः, आशीः, सङ्कीर्णम्, भाविकञ्च।

तृतीयपरिच्छेदे — षट्त्रिंशत्तमस्य यमकस्य विस्तृतं वर्णनं विद्यते। अत्रैव गोमूत्रिका-अर्धभ्रम-सर्वतोभद्र-स्वरस्थान-वर्णनियमादीनां चित्रबन्धानां लक्षणोदाहरणानिप्रदत्तानि।

अत्रैव प्रहेलिकायाः षोडशप्रकारा, दशविधा दोषाश्च। क्रमेण लक्षिताः। दण्डिनः कलापरिच्छेदलेखनस्यापि निर्देशः कृतः।[१]

आचार्यदण्डिनः काव्यादर्शः खण्डशो रीतिसम्प्रदायस्य आरम्भिको ग्रन्थः। यतो हि रीति (मार्गाद्) भिन्नाः अलङ्कारा दोषाश्चात्र वर्णिताः। अनेनैव कारणेन काव्यादर्शः साहित्य-सम्प्रदायेपु कस्याप्यन्यतमस्य समर्थको नास्ति। ग्रन्थकर्त्रा ग्रन्थोऽयं कस्यापि सुखार्थिनो राजपुत्रस्य कृते कृतः।

---

१ इत्यं कलाचतुष्पष्टिविरोधः साधु नीयताम्।
तस्याः कलापरिच्छेदे रूपमाविर्भविष्यति॥
काव्यादर्शः, ३-१७१

ग्रन्थस्य शैली सरला सारपूर्णा च। कवित्वदृष्ट्या दण्डी भामहादुत्कृष्टतरः। दण्डिनः सर्वाणि काव्योदाहरणानि मौलिकानि।

काव्यादर्शे उद्धृता ग्रन्था एते सन्ति—

छन्दोविचितिः[१](१-१२) बृहत्कथा[२](१.३८) सेतुबन्धः,।[३]

एतेषु छन्दोविचितिसम्बन्धे केचित्समालोचका अचिन्तयन्-एष दण्डिनः स्वकीयो ग्रन्थः। परं एष वैदिकच्छन्दनिरूपको ग्रन्थः। पिङ्गलनागः तस्य कर्त्ता। जैमिनिसूत्रस्य शांबरभाष्येऽपि एष चर्चितः।[४]। कौटिल्यार्थशास्त्रम्[५], आपस्तम्ब[६]धर्मसूत्रमपि एतन्नाम सूचयतः।

परमद्यावधि छन्दोविचितेः मूलस्वरूपं पाण्डुलिपिर्वा नैवोपलभ्यते। सुबन्धुरपि छन्दोविचितिं पृथग्ग्रंथरूपेण न स्वीकरोति। छन्दोविचितिमिव भ्राजमानाम् इत्यत्र छन्दोविचितेर्व्याख्यां स छन्दःशास्त्ररूपेणैव विदधाति।

दण्डिनः काव्यशास्त्रग्रन्थस्य काव्यादर्शस्याविर्भावो युगे एतादृशेऽभवत् यस्मिन् विकासपरम्परा गतिशीला नासीत्। भरतमुनेरन्तरं काव्याशास्त्रविकासः कथं कीदृक् च प्रावर्तत। अस्य प्रमाणं किमपि नोपलभ्यते। वस्तुतः दण्डी तु काव्यशास्त्रम्, अलङ्कारशास्त्रं वा गतिशीलं विधाय कतिपयान् काव्यसिद्धान्तान् प्रौढान् व्यधत्त। दण्डिनः कालः काव्यस्यात्मस्वरूपं प्रति जागरूको नासीत्।

---

१ छन्दोविचित्यां सकलस्तत्प्रपञ्चो निदर्शितः।
सा विद्या नौस्तितीर्षूणां गम्भीरं काव्यसागरम्॥ तत्रैव

२ भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम्। तत्रैव।

३ महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः।
सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम्॥ तत्रैवः—१-३४

४ शाबरभाष्यम् १.१.५. पृ.५४ आन्दाश्रमसीरीज़।

५ कौटिल्यार्थशास्त्रम्, १-३-१

६ आपस्तम्बधर्म.—२.४८.११

दण्डिनः किंवा भामहोद्भटरुद्रटानां लक्ष्यं काव्यशरीरवर्णनमेवासीत्। तथापि दण्डी दशगुणान् वैदर्भमार्गस्य प्राणान् निरूप्य काव्यशास्त्रस्य क्षेत्रे कथमप्यात्मतत्त्वस्य विवेचनं कृतवान् तथापि केवलं परोक्षरूपेणात्म- तत्त्व-निरूपणमभवत् न तु प्रत्यक्षरूपेण। परं दण्डिनः काव्य मार्गस्य निरूपणम् (आत्मतत्त्वस्य निरूपणम् वा) उत्तरवर्त्तिनः काव्याचार्यस्य वामनस्य कृते प्रथमं सोपानं सञ्जातम्, यस्य बलेन वामनः रीतिं काव्यात्मानं निरूपयामास।

शरीरं व्याख्यता दण्डिना काव्यलक्षणेऽपि पदा[1]वली विशिष्टं निरूपिता। एवं च बाह्यतत्त्वस्यैव परिभाषा दत्ता। अनुपदमेव चेष्टार्थव्यवच्छिन्नतां कथयता तेन शब्दैः सह अर्थस्यापि महत्त्वं सूच्यामास। वस्तुतः आत्मतत्त्वप्रदर्शनाभावेऽपि दण्डिनः काव्यलक्षणमुत्तरवर्त्तिनामाचार्याणां विशेषतः पण्डितराजजगन्नाथस्य कृते मार्गप्रदर्शकं सञ्जातम्। पण्डितराजो जगन्नाथः काव्यलक्षणमेवं करोति[2]। परं द्वयोर्लक्षणयोर्महदन्तरं दृश्यते। दण्डिनो लक्षणं काव्यशरीरपरं, जगन्नाथस्य लक्षणं काव्यसौन्दर्यपरम्[3]।

दण्डिप्रभृतयः प्राचीनाचार्याः शरीरं सुन्दरं कर्तुभलङ्करणं प्रत्युन्मुखाः सन्तोऽलङ्काराणां लक्षणोदाहरणयोर्व्याख्याने विशेषतः संलग्नाः। एवं संस्कृतकाव्यशास्त्रस्यारंभः अलङ्कारशास्त्रस्यैवाविर्भावः। अत एव प्राचीना बहव आचार्याः स्वग्रन्थस्याभिधानं काव्यालङ्कारमेव कृतवन्तः। एते प्राचीनाचार्या अलङ्कारमात्मतत्त्वं स्वीकर्तुं प्रयतमाना अपि स्वलक्ष्यमधिगन्तुमसमर्थाः[4]। अत एवोत्तरकालीना अलङ्कारवादिनः आचार्या अपि प्राणतत्त्वरूपेणालङ्कारस्य स्थापनां कर्तुं नालम्।

---

१ शरीरं तावादिष्टार्थव्यवच्छिन्ना पदावली। काव्यादर्शः—१.१०

२ रमणीयार्थप्रतिपादकः शब्दः काव्यम्। रसगंगाधरः

३ रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता। तत्रैव

४ तदेवमलंकारा एव काव्ये प्रधानमिति प्राच्यानां मतम्। रूय्यकः, अलंकारसर्वस्वम् पृ. ८

आचार्यो दण्डी काव्यमार्गमलङ्कारं च साम्येनैव निरूपितवान्। अतः द्वौ सिद्धान्तावेवैष काव्यमूलसिद्धान्तरूपेण प्रतिपादितवान्। डा.सुशीलकुमारडे महोदयानां मतेन दण्डो रीतिवादी आचार्यः। तस्य काव्यमार्गसिद्धान्तेऽलङ्काराणां प्रमुखं स्थानम्। तस्य गुणा अलङ्कारेष्वन्तर्भुक्ता न तु गुणेष्वलङ्काराः। काव्यादर्शाभिधाने दण्डी काव्यालङ्काराद्भिन्नः सन्नपि मुख्यतोऽलङ्कारवादी एव। दण्डिनः भामहस्य विवादोऽलङ्कारसिद्धान्तविषयेऽलङ्कारस्थापनायां वा नैव वर्तते। तयोर्मतभेदस्तु—

हेतुसूक्ष्मादयोऽलङ्कारा अथवा न ?

निन्दोपमादय उपमा भेदा न वा ?

काव्ये नायकोत्कर्षं प्रदर्शयितुं प्रतिनायकस्य वंश-

वीर्यादिवर्णनं क्रियते नैव वा ?

कथाख्यायिकयोरन्तरं मन्येत न वा ?

प्रादेशिको मार्गविभागः स्वीकर्तव्यो न वा ?

गुणाः त्रयः स्युदर्श वा ?

ओजसि गुणे समासभूयत्वं स्यान्न वा ?

प्रतिज्ञाहेतुदृष्टान्तहानिदोषोऽस्ति न वा ?

इदृहकप्रकारोऽस्ति।

अलङ्कारनिरूपणे तयोर्मतैक्यमेवमस्ति।

भामहस्यालङ्कारनिरूपणं यथा—

कवितासुन्दर्या वदनं कमनीयं सदपि विनालङ्कारं न [1]शोभते ॥

अत्र विषये दण्डी—

---

१ काव्यालङ्कारः—१-१४

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते।
ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति॥[१]

अलङ्कारसिद्धान्तनिरूपणे द्वयोर्मुख्यमन्तरमस्ति दण्डी वक्रोक्तिनिरूपणेऽनेन सह स्वभावोक्तितत्त्वं गृह्णाति तत्र भामहः केवलं वक्रोक्तितत्त्वं मुख्यं मन्यते[२]। एतस्यैव प्रभावेण भामहो वक्रोक्तिवादी आचार्यो मन्यते। एवं दण्डिभामहौ द्वावेवालङ्कारवादिनौ।

दण्डिनः काव्यमार्गे वैदर्भगौड़ीयौ प्रस्फुटान्तरौ सन्तावपि ईक्षुदुग्धगुड़माधुर्यवददृश्यान्तरौ। अत एव तयोः पृथग्विवेचनं सुतरां कठिनम्। अत एव दण्डी—

इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात्।
तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकवि स्थिताः॥[३]
इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्।
तथापि न तदाख्यातुं सरस्वत्यपि शक्यते॥[४]

एष काव्यमार्गसिद्धान्त आधुनिकं शैलीसिद्धान्तमनुसरान्निव प्रतीयते।[५]

अस्यैव काव्यमार्गस्याङ्गभूतान् गुणान् दण्डी सशक्तरूपेण न चित्रयामास। स हि मार्गसदृशगुणान् न परिभाषते। अलांरवादित्वात् सोऽलङ्कारपरिभाषामेव गुणसमाहितामकरोत्।

एतस्यैतां न्यूनतां परिसमाप्य वामनः परिभाषामलङ्कारस्य गुणानुवर्तिनीं विधाय, अलङ्कारं नवीनरूपेण चित्रितवान्[६]।

गुणपरिभाषासु भरतादग्रे सञ्चच्छमानोऽपि दण्डी पूर्णस्फुटतां नाभिव्यनक्ति। उदारताकान्त्योर्लक्षणे—नातिस्फुटे। माधुर्यपरिभाषाऽपि न स्पष्टा।

---

१ काव्यादर्शः, दण्डी, २-१
२ वक्रोभिधेय शब्दोक्तिरिष्टा वाचामलाङ्कृतिः। काव्यालङ्कारः—१-३६
३ काव्यादर्शः, दण्डी—१-१०१
४ तत्रैव—१.१०२
५ सम कन्सेप्ट्स ऑफ अलङ्कारशास्त्र, वे राघवन्, पृ. १४०
६ काव्यालङ्कासूत्रम्, वामनः ३-१-२

शब्दमाधुर्येऽर्थमाधुर्ये परस्परं समन्वयो नास्ति। अर्थमाधुर्यस्य भावात्मकत्व-मप्यस्फुटम्। भावात्मक धर्माणां श्लेष-सुकुमारताऽर्थव्याक्तीनां भावात्मक-विरोधो वर्णितः। माधुर्यसुकुमारतयोः प्रसादार्थव्यक्त्योः परस्परमन्तरमप्यस्फुटम्। उदारत्वकान्तिसमाधयोऽलङ्काररूपतां भजन्ते। गुणानां शब्दार्थाभ्यां सम्बन्धे सत्यपि तेषां शब्दगुणरूपेणार्थगुणरूपेण विभागो नैव कृतः।

गुणानामेतादृशे निरूपणे दोषयुक्ते स्फुटतारहिते सत्यपि दण्डिनो गुणनिरूपणं काव्यमार्गनिरूपणं चोत्तरवर्त्तिनां काव्यशास्त्रिणां कृते मार्गाधायक एव।

दण्डिनो दोषनिरूपणं सर्वथा वैज्ञानिकम्। कामं तेन दोषपरिभाषापि स्पष्टं न वर्णिता तथापि तस्य मतेन दोषाः परिस्फुटधर्माः सन्तो भावात्मका एव। दोषस्वरूपविषये दण्डी कथयति—

प्रसङ्गविशेषेऽवस्थाविशेषेवाऽनौचित्यहेतुर्यदि सहृदयहृदयमुद्वेजयति, स दोषरूपतामर्हति[१]। आचार्य म[२]म्मटविश्वना[३]थादिभिः काव्यात्मनिरूपणे दोषस्य यः स्वरूपः स एव दण्डिना प्राक्तने युगे प्रतिष्ठापितः। दण्डी दोषाननित्यान् स्वीकरोति। ते हि प्रसङ्गसापेक्षा अवस्थासापेक्षाः सन्तो दोषत्वमपि परिहरन्ति। गुणरूपतां च प्राप्नुवन्ति। एषा धारणाप्युत्तरवर्त्तिनामाचार्याणां कृते साहाय्यकारिणी एव।[४]

एवं दण्डिनो दोषनिरूपणं वस्तुतः सार्थकं विकासोन्मूलकं च।

---

१ काव्ये दोषा गुणाश्चैव विज्ञातव्या विचक्षणैः।
दोषा विपत्तये तत्र गुणाः संपत्तये तथा॥
काव्यादर्शः—३-१२४

२ मुख्यार्थहतिदोषः - काव्यप्रकाशः - ७-४९

३ रसापकर्षका दोषाः साहित्यदर्पणम् - ७.१

४ अस्ति काचिदवस्था सा साभिषङ्गस्य चेतसः।
यस्यां भवेदभिमता विरूद्धार्थापि भारती॥
काव्यादर्शः-३-१३३

VI

दण्डिनोऽलङ्कारस्वरूपम्

दण्डी काव्यशास्त्रेऽलङ्कारवादित्वेनैव विख्यातः। स्वग्रन्थस्य प्रारम्भे स काव्यलक्षणं परिभाष्य, तस्मिन् के के साहाय्यं विधास्यन्ति, काव्यशरीरं वा के ह्युपकरिष्यन्ति ? प्रश्नस्यास्य समाधाने लेखको यं विचारं प्रस्तौति तत्र दृश्यतेऽलङ्कारप्राधान्यम्।[१] एतदलङ्कार प्राधान्यं च पुनः स एवालङ्कार-परिभाषायां प्रतिपादयति।[२] अतः काव्यशरीरं किं वा काव्यगतंशब्दं काव्यगत-मर्थं चालङ्कारा एवालङ्कुर्वन्ति।

दण्डिनोऽलङ्कारसंख्या

दण्डिनोऽलङ्कारसंख्यायां स्फुटटतया शब्दालङ्काराणामार्थालङ्काराणां च पृथक् परिगणनं न दृश्यते तथापि तस्यालङ्कारवर्गीकरणस्य समालोचनेन शब्दालङ्काराणामर्थालङ्काराणां च भिन्ना भिन्ना संख्या ज्ञायत एव। काव्यादर्शेऽलङ्काराणां संख्या अष्टाचत्वारिशद् वर्तते। तत्रार्थालङ्कारा एकोनचत्वारिंशत्, शब्दालङ्काराः च नव सन्ति,येषु प्रथमपरिच्छेदे प्रसङ्गतो वर्णितोऽनुप्रासोऽप्यस्ति।

---

१ तैः शरीरं च काव्यानामलङ्कारश्च दर्शितः। कव्यादर्शः—१.१०

२ काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते। तत्रैव-२.१

अर्थालङ्कारेषु पञ्चत्रिशंदलङ्काराः स्वतन्त्र-सत्ताकाः, अनन्वयः-सन्देहौ [१]उपमाभेदेषु, उपमारूपको रूपकभेदेषु, उत्प्रेक्षाव[२]यवश्चत्प्रेक्षाभेदे निरूपितः, एवमेव उपमेयोपपमाऽलङ्कारः उपमाभेदेषु अनन्योपमानाम्ना सन्दर्शितः।

शब्दालङ्कारा इमे सन्ति—

अनुप्रासः, यमकः, गोभूत्रिका, अर्धभ्रमः, सर्वतोभद्रः, स्वरनियमः, स्थान-नियमः, वर्णनियमः, प्रहेलिका च। वस्तुतः एतेषु द्वावेव शब्दालङ्कारौ—अनुप्रासः, यमकः च। शिष्टाः सप्तालङ्काराश्चित्रमार्गरूपा एव।

प्राचीनालङ्कारिकेषु भामहोद्भटवामनरुद्रटप्रभृतिषु दण्डिसदृशी अलङ्कारविश्लेषणदक्षता नैव दृश्यते। स्वपूर्ववर्त्तिभरतप्रभृत्याचार्यान् अनाक्षिप्यैव, अलङ्काराणां च कात्स्न्येंन निरूपणं विधातुमशक्यत्वाद्दण्डी सनम्रं स्वालङ्कारनिरूपणसन्दर्भे कथयति[३]।

ततश्च परम्परागतान् सर्वानलङ्कारान् संगृह्यैकत्र निरूपयति। दण्डिवर्णिताऽलङ्कारभेदाः (सामान्येनैव निर्दिष्टा अपि) उत्तरैराचार्यैः स्वतन्त्ररूपेण स्वीकृताः। ते सन्ति—

अत्युक्तिः, अधिकम्, अनुमानम्, असङ्गतिः, कारकदीपकम्, निश्चयः, परिसंख्या, प्रतीपः, भ्रान्तिमान्, मीलितम्, विषमम्, समम् समाधिश्च। एतेनाऽलङ्कारनिरूपणेनाऽलङ्कारभेदनिरूपणेन वा सम्यग् ज्ञायते—काव्यादर्शः शास्त्र-ग्रन्थः, आकरग्रन्थो वा, मार्गदर्शकशास्त्रं वा।

---

१ अनन्वयससन्देहावुपमास्वेव दर्शितौ।
उपमारूपकं चापि रूपकेष्वेव दर्शितम्॥ तत्रैव २-३५८

२ उत्प्रेक्षाभेद एवासावुत्प्रेक्षावयवोऽपि यः।
नानालङ्कारसंसृष्टिः संसृष्टिस्तु निगद्यते॥ तत्रैव २-३५९

३ किन्तु बीजं विकल्पानां पूर्वाचार्यैः प्रदर्शितम्।
तदेव परिसंस्कर्तुमयमस्मत्परिश्रमः॥ काव्यादर्शः - २.२

अलङ्काराणां भेदाः

दण्डिकृताः स्वतन्त्रता पंचत्रिंशदलङ्कारा भेदोभेदरूपेण नवत्यधिकशत-रूपतां प्राप्नुवन्ति। तत्र—

उपमायाः—द्वात्रिंशत्।

आक्षेपस्य—चतुर्विंशतिः।

रूपकस्य—विंशतिः।

हेतोः—षोडश।

दीपकस्य—द्वादश।

व्यतिरेकस्य—दश। भेदाः सन्ति।

एवमेव

श्लेषस्य—नव।

अर्थान्तरन्यासस्य—अष्टौ।

रसवतः—अष्टौ।

विरोधस्य—षट्।

विशेषोक्तेः—पंच।

स्वभावोक्तेः—चत्वारः।

समासोक्तेः—चत्वारः।

लेशस्य—चत्वारः। भेदाः सन्ति।

आवृत्तेः—त्रयः।

अपह्नुतेः—त्रयः।

विभावना-अतिशयोक्ति-उत्प्रेक्षा-सूक्ष्म-श्रेयः-उदात्त-तुल्ययोगिता-व्याजस्तुति-निदर्शना-सहोक्ति-संसृष्टीनां द्वौ द्वौ भेदा॥

एकमेव भेदं धारयन्ति—

यथासंख्य-उर्जस्वि-पर्यायोक्त-समाहित-अप्रस्तुतप्रशंसा-परिवृत्तिः-आशीः-भाविकाः।

शब्दालङ्कारेषु यमकस्यानेके भेदाः। एते संख्यारूपेण पञ्चदशाधिकत्रिशतम्। परं केवलं पञ्चाशद्भेदानमिव स्वरचितोदाहरणानि प्रदत्तानि। एतादृशं यमकभेदप्रदर्शनं काव्याकारेषु दण्डिनं सर्वोत्तमपदे स्थापयति।

अन्येषु शब्दालङ्कारेषु स्वर-स्थान-वर्ण-नियमानां प्रत्येकं चत्वारो भेदाः प्रहेलिकायाश्च षोडश भेदाः प्रदर्शिताः। एंतस्यालङ्कारभेदेषु गुण-रस-लक्षण-सन्धि-सन्ध्यङ्ग-वृत्ति-वृत्त्यङ्गानि स्वत एवान्तः स्यूतानि जायन्ते। तानि लेखकः काव्यशोभाकराण्येव निश्चिनोति।[1]

दण्डिनोऽलङ्कारनिरूपणे सर्वाधिकं गौरवास्पदमस्ति स्वभावोक्त्यलङ्कार निदर्शनम्। एतस्यालङ्कारस्य माध्यमेन दण्डी यां कविस्वाभाविकतां निर्दिशति, सैव भामहस्य वक्रोक्तिस्थापनायां, किं चाचार्यकुन्तकस्य 'वक्रोक्तिः काव्यजीवितम्' एवं काव्यसम्प्रदायेषु अन्यतमस्य सम्प्रदायस्योद्भाविका सञ्जाता।

भाविकालङ्कारस्य लक्षणे दण्डी यं भावविशेषं स्थापयति, यो गुणालङ्कारयोः समन्वयकारकः सन् कवेः काव्यस्य सौन्दर्यतत्त्वमुद्भावयति, स एव भावः काव्यस्य प्रयोजकः सन् आद्यन्तं यावद्विद्यमानो नीरसेऽपि शब्दसमूहे प्राण-सञ्चारं करोति।[2]

एतस्यैव भावस्य विषये विश्वनाथः स्वविचारान् प्रश्नोत्तररूपेणैव सङ्केतयति—

---

१ यच्च सन्ध्यङ्गवृत्त्यङ्ग लक्षणाद्यागमान्तरे। व्यावर्णितमिदं चेष्टमलङ्कारतयैव नः॥ काव्यादर्शः—२-३६७

२ भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम्। भावः कवेरभिप्रायः काव्येष्वासिद्धि संस्थितः॥ तत्रैव २.३६४ व्यक्तिरुक्तिक्रमबलाद् गम्भीरस्यापि वस्तुनः। भावायत्तमिदं सर्वमिति तद्भाविकं विदुः॥ तत्रैव-२-३६६

काव्ये, नाटकादिषु वा यानि पद्यानि सौन्दर्यतत्त्वरहितानि, तेषु रसत्वं कथं स्वीकरिष्यते। स्वयं च उत्तरति-रसयुक्तेषु पद्येषु यो रसरूपः स एव नीरसवद्येषु रसिकतामापादयति।[१] अनेन दण्डिनः काव्यक्षेत्रे कौशलत्वं परिचीयते, यस्य भावः एव विश्वनाथेन रसरूपे स्वीकृतः।

दण्डिनोऽलङ्कारपरिभाषया विशेषरूपेण विरोधमूलकानामलङ्काराणां परिभाषाः सुस्पष्टं नैव व्याख्याताः। एतस्यालङ्कारभेदानामैतिहासिकमहत्त्वे सत्यपि स्वरूपनिर्धारणं न तथाभिव्यक्तम्। दण्डिनो वैदुष्यं दक्षत्वं चानेनैव परिचीयते यदेतत्प्रदत्तानि सर्वाण्युदाहरणनि तेन स्वयमेव रचितानि। एतस्य वहूनि काव्योदाहरणानि परवर्त्तिभिराचार्यैर्यथातथमेव स्वीकृतानि। कानिचिदुदाहरणनि च सुभाषितरूपेणापि प्रख्यातानि।

उपर्युक्तविश्लेषणेन दण्डिनः काव्यशास्त्रस्य प्रत्येकं क्षेत्रेऽमूल्यं कृतित्वं द्योतते। पूर्वविद्यमानानां संकल्पनानां न केवलं नूतनव्याख्या प्रस्तुता। परं तासु समाशोधनमपि कृतम्। वस्तुतो दण्डिनः प्रतिभा नवनवोन्मेषशालिनी, शक्तिश्च विशदविवेचनपूर्णा, सूक्ष्मेक्षिकासंयुक्तं वैदुष्यं च सर्वैः काव्यसमालोचकैः संस्तूयते। अतः दण्डिनः काव्यादर्शः संस्कृतकाव्यशास्त्रपरम्परायां पुरातनसिद्धान्त-प्रतिपादने नूतनसिद्धान्तानां च प्रस्तुतीकरणे सर्वेषां काव्यशास्त्राध्येतृणां कृते मार्गदर्शकः।

---

१ ननु तर्हि प्रबन्धान्तर्वर्तिनां केषाञ्चिन्नीरसानां पद्यानां काव्यत्वं न स्यादिति चेन्न? रसवत्पद्यान्तर्गतनीरसपदानामिवपद्यरसेन प्रबन्धरसेनैव तेषां रसवत्ताङ्गीकारात्। साहित्यदर्पणम्, विश्वनाथः, पृ.१९

VII

उत्तरवर्त्तिषु काव्याचार्येषु दण्डिनः प्रभावः

दण्डिनः काव्यादर्शपरिचये पूर्वं तावद्भामहोपरि तस्य प्रभावोऽनयोः साम्ये पार्थक्ये च यद्यन्मतं तत्सर्वं प्रदर्शितम्। दण्डिभामहयोः पौर्वापर्ये च यानि मतानि सन्ति तेषां सर्वेषां व्याख्यानेन निर्धारितं यद्भामहो दण्डयुत्तर-वर्त्ती एव।

काश्मीरसाहित्यशास्त्रिणामाचार्याणां परम्परा दण्ड्यपेक्षया भामहं प्रति समाकृष्टा यतो हि भामहः काश्मीरप्रान्तीयः। तेषु जयापीडस्य राजसभायां (७७९-८१३ ख्रिस्ताब्दे) उद्भट आचार्यो द्वादशालङ्कारणां लक्षणानि भाम-हादेव यथातथं गृहीतानि।

आचार्ये वामने उद्भटसमकालीने काश्मीरप्रदेशीये सत्यपि दण्डिनः प्रभावः स्फुटं लक्ष्यते। दण्डिनो दश गुणान् शब्दगुणार्थगुणरूपेण विभज्य विंशतिसंख्याकान् अकरोत्। दण्डिनः द्वौ काव्यमार्गौ पाञ्चाल्या नवीनया रीत्या संयोज्यैष सर्वप्रथमं काव्यात्मपदे रीतिं संस्थापयामास। वामनस्य काव्यासिद्धान्तेषु यत्र तत्र दण्डिप्रभावो विद्यते।

काश्मीरपरम्पराया एवाचार्यो रुद्रटः (८५० ख्रिस्ताब्दः) दण्डिपरम्परां पोषयन् काव्यस्य तिसृषु रीतिषु चतुर्थां लाटीं रीतिं संयुयोज। रुद्रटस्य नवीनेष्वलङ्कार-विकल्पेषु दण्डिनोऽलङ्कारविकल्पप्रभावो दृश्यते।

अग्निपुराणस्य येषु (३३७-४७) अध्यायेषु काव्यक्षेत्राणां निरूपणं, तत्र काव्यलक्षणं, काव्यभेदाः, रीतिः, अलंकाराः, गुणा दोषाश्च लक्षिताः। अत्र कतिपयेषां गुणानामलङ्काराणां च लक्षणानि दण्डिनो लक्षणैः पूर्णसमानि विद्यन्ते।

अग्निपुराणानन्तरं पूर्वप्रचलिताऽलङ्काररीतियुगपरम्परा परिसमाप्ता। इतः प्रभृति काव्यात्मविषयें यो विचारः प्रारब्धः, तत्र प्रथमो ग्रन्थो ध्वन्यालोकः।

अस्य टीकाकारोऽभिनवगुप्तो गुणालङ्काराभेदनिरूपणे, रसनिष्पत्तिप्रसङ्गे, चम्पूकाव्यप्रसङ्गे चाचार्यं दण्डिनं सादरं निर्दिशति।

राजशेखरः स्वकाव्यमीमांसायां बहूनां काव्यशास्त्राचार्याणां परिचयेषु, कविसमयस्थापनाप्रसङ्गे काव्यादर्शस्यैकं पद्यमुद्धरति[१]

काश्मीरप्रदेशीय आचार्यः कुन्तको वक्रोक्तिजीविते नाम्नि स्वग्रन्थे वक्रोक्तिनिरूपणं काव्यात्मरूपे करोति। वस्तुतो वक्रोक्तिराधुनिकं शैलीविज्ञानम्। अत्र भावपक्षापेक्षया कलापक्ष उत्कृष्टतरः साध्यते। रसोऽप्यत्र वाक्यवक्रतायाः प्रबन्धवक्रताया एवैकं रूपम्। वक्रोक्तिव्याख्याने रीतिसिद्धान्तस्य परम्पराऽनिवार्या। कुन्तकः सुकुमारविचित्रमध्यमान् काव्यमार्गान् व्याचष्टे। त एते मार्गा वैदर्भीगौड़ीपाञ्चालीरूपा एव। कुन्तको हि स्वग्रन्थे दण्डिनं लक्षणकारनाम्नोल्लिखति।

दशमशताब्द्यां एकादशशताब्द्याः प्रारम्भे वा भोजदेवक्षेमेन्द्र-महिमभट्ट-मम्मटेषु सरस्वतीकण्ठाभरणश्रृङ्गारप्रकाशयोलेखकः भोजदेवः एकचत्वारिंशत् कारिकाः चतुष्षष्ट्यधिकैकशतं च श्लोका दण्डिना यथातथं गृहीताः।

आचार्यः क्षेमेन्द्र औचित्यविचारचर्चायामौचित्यसिद्धान्तं व्याचष्टे। औचित्यं गुणदोषालङ्कारेष्वनिवार्यमेव। अतः दण्डिनो गुणदोषालङ्कारपरिभाषासु औचित्यबीजानि लक्षितुं पार्यन्ते। काममीदृशमालोचनं प्रशस्तं न मन्यते परं उत्तरवर्त्तिषु लेखकेषु पूर्ववर्त्तिनः प्रभावं निर्णेतुमेतादृशमनुसन्धानं लक्ष्यपरमेव भवति।

आचार्य क्षेमेन्द्रानन्तरं व्यंजना, ध्वनिविषयका ग्रन्था लिखिताः, महिमभट्ट-मम्भट-वाग्भटादय एत आचार्या यत्रतत्र प्रसंगेषु रीतिशब्दं तु प्रयुञ्जते, परं स्पष्टतया निर्देशं न विदधते। एतेषु वाग्भटस्य गुणाविवेचनं दण्डिना स्फुटं साम्यं विदधाति। द्वादशशताब्द्या अन्ते त्रयोदशशताब्द्याः प्रारम्भे वा शोभाकरमित्रोऽलङ्काररत्नाकरनामकं ग्रन्थं विरचितवान्। नाम्नैव

१ मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः। कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि॥ काव्यादर्शः—१-७०

काव्यालङ्कारपरम्पराप्रतिपादक एष ग्रन्थः। अस्योपपरि दण्डिभामहरूद्ररानां प्रभावः सुस्पष्टः।

चन्द्रालोककर्ता जयदेवः त्रयोदशशताब्द्यां प्रायशः सर्वेषां काव्यशास्त्रविषयाणां विवेचनं करोति। अस्यालङ्कारविचारः सर्वथा पूर्ववर्त्तिभिराचार्यैः सह साम्यधारकः। तेषु तेषु चाचार्येषु दण्डी विशिष्टं स्थानं लभते। यतो ह्येष एव प्रथम अलङ्कारसंस्थापक आचार्यः।

चतुर्दशशताब्द्या लेखको वाग्भटद्वितीयः स्वकीये काव्यानुशासने लक्षणग्रन्थे गुणविवेचनं सम्यग् विदधति। अत एषोऽपि वामन वाग्भटप्रथमाभ्यां सह दण्डिनं प्रति कृतोपकारित्वं ज्ञापयति।

काव्यलक्षणकारेषु प्रायशोऽन्तिम आचार्यः पण्डितराजो जगन्नाथः काव्यलक्षणे रमणीयार्थं विशदं व्याख्याति। रमणीयतायाः काव्यसौन्दर्यं द्वितीयार्थः। काव्यसौन्दर्याय च गुणालङ्काररीतीनां सम्यक् सन्निवेशोऽनिवार्यः। दण्डी च काव्यादर्शे गुणालङ्कारविवेचनं प्राथम्येन विहितवान्। अतः पण्डितराजोऽपि दण्डिनं प्रति कृतज्ञतामर्हति।

काव्यादर्श एवं भारतीयकाव्यशास्त्रपरम्परायां महत्त्वपूर्णं स्थानमाकलयति। कामं दण्डिपूर्ववर्त्तिन आचार्याः तेनापरिचिताः तथापि सर्वे पूर्वाचार्याः तेन परिचिता एवासन्। आचार्यो दण्डी लिखति—

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदिशब्दाह्वयं ज्योतिरासंसारं न दीव्यते॥[1]

अनेन कथनेनाचार्यः सर्वानिव काव्यपथि वर्तमानान् आचार्यान् शब्दज्योतिः प्रति समुत्सुकान् स्वीकरोति। महर्षि-पतञ्जलेः कथनमस्ति-लक्ष्यलक्षणे व्याकरणम्।[2] यस्य तात्पर्यमस्ति लक्ष्ये पूर्वं विद्यमाने सति तस्य लक्षणं क्रियते। अतः स्पष्टमिदं यदाचोर्या दण्डी यदा काव्यदर्शं

१ काव्यदर्शः—१-४
२ महाभाष्यम्, पतञ्जलिः, पस्पशाह्निकम्।

विरचितवान् तस्य सम्मुखे कतिपयानि लक्ष्याणि विद्यमानान्येवासन्। तानि बाल्मीकिरामायणसदृशानि वा स्युः, रघुवंशसदृशानि वा स्युः, सेतुबन्धसदृशानि वा स्युः। तेषां तेषां स्वकाले वर्तमानानां लक्ष्याणां रूपं दर्शं दर्शं दण्डी स्वकाव्यक्षेत्रपरम्पराः, धारणा लक्षणानि वा विनिर्ममे।

आचार्य दण्डिनः प्रयासः सर्वथा श्लाघ्यो येन सर्वेषामुत्तरवर्त्तिनामाचार्याणां कृते प्रकाशस्तम्भरूपो ग्रन्थो निर्मितः। तैः तैः सर्वैरुत्तरवर्त्तिभिराचार्यैः स्व-स्व-जिज्ञासां शमयितुं, स्वविचारान् वा समेधयितुं दण्डिनः तत् तत् सर्वं गृहीतं यत्तेषां कृते स्वीकार्यमभवत्। यद्यच्च त्याज्यं तत्सर्वथा परित्यक्तम्। एवमाचार्यो दण्डी काव्यक्षेत्रे युगान्तरं यावद् देदीप्यमाननक्षत्रमिव राराजमानो भविष्यति।

VIII

गद्यकारो दण्डी

काव्यादर्शस्य लेखकत्वसम्बन्धे पूर्वे प्रकरणे निर्णीतं यद्दण्डी सप्तमशताबादीक आचार्यो दक्षिणात्यो भारवेः पौत्र आसीत्। तस्य दाक्षिणात्यत्वं साधयितुं काव्यादर्शे विद्यमाना मलयानिल-काञ्ची-कावेरी-चौलशब्दाः सन्ति, दशकुमारचरितेऽपि काञ्ची-सुह्मदेश-अश्मकदेश-लाटदेश-कालपत्तनद्वीप-अङ्गदेश-अनङ्गदेश-चम्पा-उज्जयिनी-श्रावास्ती-पुण्ड्रदेशादिशब्दा विद्यन्ते।

अपरत्र द्वयोरेव रचनयोः विदर्भदेशस्य वर्णित्वाद् विद्वांस एनं विदर्भदेशवासिनं वक्तुं प्रयतन्ते। तस्य शैल्यामपि वैदर्भीरीत्याः प्राधान्यं, येन तस्य काश्मीरेतरप्रान्तवासित्वं सूच्यते। परं कालान्तरे प्राप्तयाऽवन्तिसुन्दरी कथया दण्डी स्वयं सूचयति—

ततः कथंचित्सा गौरी द्विजाधिपशिरोमणेः।
कुमारं दण्डिनामानं व्यक्तशक्तिमजीजनत्॥

अतो निर्णीयते दण्डी काञ्चीवासी सन्नेवेतस्ततः भ्रमणपरो विदर्भेणापि महान्तं सम्बन्धं धारितवान्।

एतस्य रचनानां विषये यथा समालेचका नैकमतानि प्रकटयन्ति तथैव स्थितिकालस्य विषयेऽपि विविधमतमवलम्बन्तो दृश्यन्ते। काव्यादर्शस्य प्राथमिक्यां भूमिकायां प्रथममेव निर्णीतं यदागाशे महहोदयस्य मतं कथमपि प्रामाणिकं नास्ति। अस्य गद्यकृतेर्दशकुमारचरितस्याधारो वर्तते गुणाढ्यस्य बृहत्कथा। अस्या भौगोलिकप्रदेशा एव दशकुमारचरिते विद्यमानाः सन्ति।

विदर्भस्य प्रतिराज्यान्यस्य प्रमाणानि। अश्मकस्य तालिका विदर्भस्य दाक्षिणात्यत्वं प्रमाण्यते। कुन्तलसीमाऽपि उत्तरे नर्मदां, दक्षिणे तुंगभद्रां, पश्चिमे अरबसागरं, दक्षिणपूर्व च गोदावरी पूर्वीं प्रादेशिकसीमामस्पृशत्।

ऋषिकाश्च विदर्भमाहिष्मत्योर्मध्येऽवसन्। यद्येते देशा वाकाटकेषु वर्तमाना अभवन् तर्हि वाकारटकाभिलेखेषु तेषामुल्लेखः स्यात्। अपरत्र चैते प्रतिराज्यात्मक प्रदेशाः सातवाहनयुगीना आसन्। गुणाढ्यश्च सातवाहनकालीन आसीत्। सातवाहनसीमाया उल्लेख एव दशकुममारचरिते प्राप्येत।

अन्यत्रापि गौतमीपुत्रस्य माता बालश्री नासिक्ये लेखे गौतमीपुत्रस्य राज्यवर्णनेऽसिकशब्दोऽस्ति। आसिक ऋषिक एव। मूलकशब्देन मुरलदेशस्योल्लेखः। अत्रैव च दशकुमारचरिते वर्तमानस्य कोंकणस्य कृतेऽपरान्तशब्दः प्रयुक्तः। द्वयोरेव विदर्भशब्दः समानः।[१]

दण्डिनः स्थितिकालं निर्णेतुमन्येऽपि बहवः प्रदेशाः। आचार्योऽभिनवगुप्तो ध्वन्न्यालोकस्य लोचननाम्नयां टीकायां प्रतिहारेन्दुराजकृतस्य काव्यालंकारसंग्रहस्य लघुवृत्त्यां दण्डिनो निर्देशः स्पष्टः। एतदतिरिक्तं सर्वेषान्येषामाचार्याणां समालोचकानां च मतानि काव्यादर्शस्य कालनिर्णय पूर्वमेवोल्लिखितानि।

अत्र पुः गद्यकारदण्डिनः कालनिर्णये यथा पूर्वं दण्डिभामहयोः कालविचारः कृतस्तथैव दण्डिबाणयोः कालीनिर्णयो विधीयते।

पीटरसनयाकोबीमतेन काव्यादर्शस्यैकस्मिन् पद्ये[२] शुकनासो प्रदेशे वर्णितस्य यौवनान्धकारस्योल्लेखो विद्यते।[३] परमनेन न कोऽपि विरोधो गम्यते। दण्डिनो दशकुमारचरितस्य भौगोलिक राजनीति वर्णनाभ्या पूर्वतरमेवाभाति। दण्डिनः प्रसादगुणात्मिका शैली बाणपूर्ववर्त्तिन्येव। अतः ऐतिहासिकभौगोलिकप्रमाणैरिदं निर्धारयितुमलं यद्दण्डी बाणात्पूर्वः एव।

---

१ रैरसन केटलाग आफ इण्डियन् क्वाइन्स पृ.३०

२ अरत्नालोकसंहार्यमवार्यं सूर्यरश्मिभिः। दृष्टिरोधकरं यूनां यौवनप्रभवं तमः॥ काव्यादर्शः, दण्डी - २.१९७

३ केवलं च निसर्गत एवाभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहन तमो यौवनप्रभवम्।

दण्डिनो गद्यकृतिः– दशकुमारचरितम्

दण्डिनः कृतिर्दशकुमारचरितं गुणाढ्यस्य बृहत्कथायामाधृता दृश्यते। कामं दशकुमारचरिते गुणाढ्यस्य बृहत्कथाया वा कुत्राप्युल्लेखो नैव परं दशकुमारचरितप्रथमोच्छवासे सुरतमंजरी कथयति- वेगवतः पौत्रो मानसवेगस्य च पुत्रो वीरशेखरः विद्याधरसमाजः सन्ततिविरोधी आसीत्। अतः दण्डी बृहत्कथयाऽभिज्ञः।

बृहत्कथायां यथा नरवाहनदत्तः स्वसखिभिः सह विचित्राणां घटनानां साहसिककार्याणां च वर्णनं कुर्सत तथैव दशकुमारचरितपात्राणि साहसिकघटना वर्णयन्ति। दशकुमारचरितस्य यद्रूपमद्यत्वे समालोचकैः प्राप्यते तेन तदपूर्णमेव प्रतिभाति। अत एवान्यलेखकाभ्याभस्य पूर्णतां विधातुं पूर्वपीठिका उत्तरपीठिका च संयोजिता।

एवं दशकुमारचरिते त्रिभागाः सन्ति। पूर्वपीठिका, दशकुमारचरितम्, उत्तरपीठिका च।

पूर्वपीठिकायां षट् उच्छवासाः सन्ति। दशकुमारचरिते अष्टौ उच्छ्वासाः, उत्तरपीठिकायां कथाया उपसंहारः। अतो नाम्ना निर्दिश्यमानं दशकुमारचरितम् आद्यन्तयोरपूर्णमेव। पूर्वपीठकालेखकस्य तु नाम न ज्ञायते परमुत्तरपीठिकालेखकः कश्चित् चक्रपाणिदीक्षितः।

पूर्वपीठिकायां कोऽपि परवर्त्ती विद्वान् अपूर्णं दशकुमारचरितं पूर्णमाधातुं द्वयोरन्ययोः राजकुमारयोः कर्थं समयोजयत्। अत एव पूर्वपीठिकायामर्थपालप्रमति विश्रुतानां या वंशावली वर्णिता, उत्तरवत्ति राजकुमारवंशावल्या सह तस्याः सम्बन्धो व्यक्तो न भवति।

दण्डिनः कथायामर्थपतिः कान्तिमत्याः प्रमतिश्च तारावल्याः पुत्रो दर्शितः। परं पूर्वपीठिकायामर्थपतिः तारावल्याः प्रमातिश्च सुमतिपुत्रः कथितः। इत्थमेव दण्डी विश्रुतस्य पितुर्नाम वैश्रवणं, पितामहस्य च सिन्धुदत्तं वर्णयति परं पूर्वपीठिकायां सिन्धुदत्तस्य स्थाने पद्मोद्भव इति नाम निर्दिष्टम्। दण्डिनो वक्तव्यास्ति यद् राजवाहनस्य राजकुमार्याश्च भोगवि-

लासान् पुनर्दीपयितुं दशकुमारचरिते कथा निरूपिताः। पूर्वपीठिकानुसारं तु राजवाहनस्य प्रथमसमागमे एव राजकुमारीं श्रावयितुमेताः कथाः कथिताः।

तथैव पूर्वपीठिकानुसारं कथानां विषयाः विप्राणां चतुर्दश लोका नन् तु शृङ्गाररसः। परं दण्डी श्रृङ्गाररसस्योद्बोधनार्थमेताः कथाः कथितवान्।

उत्तरपीठिकायाः कथाक्रमे विदुषांमते न कश्चिद् विवादः। दशकुमार-चरितस्य कथानां वर्णनं षोडशवर्षीयमेव। स्वनवभिर्मित्रैः सह युवराजराज-वाहनस्य विजययात्रा गृहान्निर्गमनात्प्रत्यागमनं यावत् षोडशवर्षैः समापन्ना।

दशकुमाराः तेषां परस्परं सम्बन्धश्चेत्थं वर्णितुं शक्यते।

(अ) **राजहंसः** मगधस्य राजा

राजवाहनः (प्रथमः कुमारः)

(ब) **प्रहारवर्मा** - विदेहस्य राजा

अपहारवर्मा (द्वि.कु.) **अपहारवर्मा** (तृ.कु.)

(स) **धर्मपालः** - राजहंसामात्यः

सुमन्त्रः सुमित्रः कामपालः

मित्रगुप्तः (च.कु.) **मन्त्रगुप्त** (पं.कु.)**अर्थपालः** (ष.कु.)

(द) **पद्मोद्भवः** (राजहंसामात्यः)

सुश्रुतः रत्नोद्भवः

विश्रुतः (सप्तमः कुमारः) **पुष्पोद्भवः** (अष्टमः कुमारः)

(ई) सितवर्मा (राजहंसामात्यः)

सुमतिः सत्यवर्मन्

प्रमतिः (नवमः कुमारः) **सोमदत्तः** (दशमः कुमारः)

IX

दशकुमारचरितस्य संक्षिप्तः कथासारः

मगधनेरशो राजहंसो मालवनरेशं मानसारं युद्धे पराजयते। परं सदयं तं स्वतन्त्रं कृत्वा तद्राज्यमपि निवर्तयति। तथापि परास्तो मानसारोऽनन्तरं तपोबलेन शक्तिशाली सन् राजहंसमाक्रमते। ततः पराजितो राजहंसः स्वपत्न्या वसुमत्या सह वने वस्तुमारभते। तत्र तस्य राजवाहनाभिधो सुतो जायते। तत्रैव च रावाहनस्यान्येषां नवसहचराणामपि जनिर्भवति। येषु सप्त मन्त्रिपुत्राः द्वौ राजहंससखस्यः राज्ञः प्रहारवर्मपुत्रौ स्तः।

तारुण्यमधिगतास्ते दश राजकुमाराः दिग्विजयाय प्रतिष्ठन्ते। परं परस्परं वियुज्यन्ते। किंचित्कालानन्तरं पुनः संयुक्ताः ते सर्वेस्वस्वसाहसिक कृत्यानि वर्णयन्ति। एतानि कृतान्यतीव मनोरंजकानि रोचकानि च सन्ति। सर्वे च पुनः एकत्रीभूय राजहंसशत्रून् मानसारादीन् पराजित्य पुनर्मगधराज्यमधिगत्य सुखेन जीवितुमारभन्ते।

उच्छ्वासक्रमेण कथायाः सार एवमास्ति
पूर्वपीठिका

प्रथम उच्छ्वासः —राजहंसो मगधस्य प्रतापी दानी च सम्राट् अस्ति। तस्य राजनगरी पुष्पपुरी आसीत्। वसुमतीनाम्री राजहंसस्य साम्राज्ञी आसीत्। धर्मपालपद्मोद्भवसितवर्माभिधाः तस्य त्रयोऽमात्या आसन्। धर्ममालस्य सुमन्त्र-सुमित्र-कामपालभिधाः त्रयः सुता आसन्। सुश्रुतरत्नोद्भवौ पद्मोभवस्य सुतौ, सितवर्मणोऽपि द्वौ सूनू सुमतिसत्यवर्माभिधावास्ताम्।

तेषु कामपालो दुराचारी व्यसनी सन् विलासिताया जीवनमनैषीत्। रत्नोद्भवश्च विदेशेषु व्यापारवान्, सततं यात्रापरायण अभवत्, सत्यवर्मा तु

संसाराद् विरक्तः सन् विदेशे विविधप्रदेशेषु यात्रामकरोत्। शिष्टाश्चत्वारो मन्त्रिसुताः स्वस्वजनकानां मन्त्रित्वस्य भारमुदवहन्।

राजहंसमानसारयोः करालकालाकलितं युद्धमभवत्। पूर्वं तु राजहंसो विजयं लेभे परं पुनः परास्तः सन् विन्ध्याटवीं शरणमगात्। तत्र स वामदेवनामानं सन्यासिनं स्वराज्यं पुनरधिगन्तुमर्चयामास, वामदेवः तं किंचित्कालं यावत् तत्रैवाधिक्स्तुमाज्ञापयामास, तस्य चत्वारो मन्त्रिणोऽपि तत्रैव प्रत्यावर्तन्त।

अत्र विन्ध्यपर्वतवनेषु राजहंसस्य राजवाहनाभिधः सुतः समुत्पन्नः। तदैव तस्य चत्वारो मन्त्रिणोऽपि सन्ततिमलभन्त। सुमति प्रमतिं सुमन्त्रो, मित्रगुप्तं सुमित्रो मन्त्रगुप्तं, सुश्रुतश्च विश्रुतम्। राजहंसे विन्ध्याटयां वसति सति, विविधावसरेषु पंचान्ये राजसुताः तत्र समाजग्मुः।

प्रहारवर्मा मिथिलाधिय राजहंससरवा आसीत्। राजहंसे पराजिते सति प्रहारवर्मा स्वदेशं निवर्तयायास। तस्मिन् निवर्तमाने शबराः तमाक्रमन्त। प्रहारवर्मणः सेवकाः सैनिकाश्च ततो भिन्नाः। अस्मिन् युद्धे प्रहारवर्मणः द्वौ सुतौ तस्माद्वियुक्तौ। एकस्तु ब्राह्मणेनैकेन संरक्षितः सन् राजहंसस्य समीपे प्रापितः। राजहंसस्तमुपहारवर्माभिधमभिधायान्यैः राजसुतैः सह पालयमास।

अन्यस्मिन्नवसरे प्रहारवर्मणो द्वितीयः सुतोऽपहारवर्मा तत्रैव समागतः। रत्नोद्भवः स्वपत्न्या सह समुद्रयात्रायां निमग्नः। रत्नोद्भवस्य पत्नी सुतमेकमसूत परं सोऽपि जनन्या वियुक्तः। एनमपि द्विज एकः संररक्ष, राजवाहनस्य समीपे च पुष्पोद्भवनामानमेनं प्रापयामास।

कामपालो यक्षप्रधानसुतां तारावलीमुपयेमे। द्वयोरेतयोः सुतं तारावली राजहंसमहिष्याः समीपेऽर्थपालनामानं कृत्वा प्रापयत्। सत्यवर्मणः सुतः तस्य विमात्रा नद्यां प्रक्षिप्तः परं कथमपि संरक्षितः सोमदत्तनामा च तेषां राजसुतानां मन्त्रिसुतानां च पार्श्वे समधिगमितः।

त एते दश राजकुमाराः एकत्रिताः सन्तः एकत्रैव शिक्षामधिगत्य कलाविज्ञाननिष्णाता अभूवन्।

द्वितीय उच्छ्वासः — सर्वे राजकुमाराः वामदेवादेशेन, राज्ञा राजहंसेन दिग्विजयार्थं सम्प्रेषिताः। सर्वे ते युगपद्यात्रार्थं प्रचलिताः स्वल्पं कालं यावच्च सहैव संययुः। यथैव विन्ध्याटवीं प्रापुः राजवाहनः केनपि ब्राह्मणेन तेभ्यो बलाद्वियोजितः। स ब्राह्मणो राजवाहनमकथयत् यत्स्वप्ने शिवेन सपातालविजयार्थं समाज्ञप्तः। राजवाहनो विप्रश्च पातालमधिगतौ, विजयिनौ चाभवताम्। यथैव राजवाहनः पुनः सवपूर्वस्थानमागच्छत् स स्वसहचरान् तत्र नाधिगतवान्

राजवाहनादि्भन्नाः सर्वे राजसुताः तमन्वेषयितुमितस्तो विजयार्थं प्रचलिताः। ते सर्वे राजकुमाराः राजवाहनेन संयोगात् पूर्वं यद्यत् कर्म, सुकर्म वा कृतवन्तः तत् सर्वं तस्य सम्मुखेऽवर्णयन्।

राजवाहनश्च सहचारान् सकलांस्तान् गवेषयन् कथंचिदुज्जयिनीं, समधिगत्यैकस्मिन्नुपवने सोमदत्तेन समागतः। सोमदत्तेन सहासीदेकाऽपूर्वसुन्दरी। राजवाहनो यथैव तद्विषये ज्ञातुमियेषु ,सोमदत्तः स्ववृत्तान्तममित्थं वक्तुमुपचक्रमे।

तृतीय उच्छ्वासः — लाटदेशनृपो मत्तकालो वामलोचनानाम्रीं वीरकेतुसुतामुपयन्तुमुज्जयिनीमाचक्राम, सोमदत्तो वीरकेतुपार्श्वान्मित्तकालमाक्रम्य तं वीरगतिं प्रापय्य, वीरकेतुना न केवलं सम्मानितोऽपि तु युवराजपदवीं प्रापितः वामलोचनया चोद्वाहितः। केनापि दैवज्ञेन स आदिष्टो महाकालमन्दिरं द्रष्टुम्। महाकालमन्दिरे सपत्नीकः सोमदत्तो यथैव राजवाहनं स्वचरितं कथयामास, पुष्पोद्भवस्तत्रैव सम्प्राप्तः। सोऽपि स्वचरितं चित्रयितुं समादिष्टः सन् स्वचरितमेवमुपवर्णयामास।

चतुर्थ उच्छ्वासः — कतिचिद् दिवसानितस्तो भ्रमन् पुष्पोद्भवो गगनतलात्पतन्तमेकं पुरुषमपश्यत्। एष आसीद् रत्नोभवः षोडशवर्षपूर्वं समुद्रनौव्यसने पत्न्या वियुक्तः। रत्नोद्भवः शोकाकुलः सन्नात्महत्यायै तत्परः सुतेन संरक्षितः। तस्मिन्नेव काले पुष्पोद्भव अग्निसात्कुर्वन्तीमेकां नारीमपश्यत् याऽऽसीत् तन्यता। एवं मातापितृसंयुक्तः स उज्जयिनीं प्रत्युज्जगाम। तत्रैव सखायमेकं वणिजं बन्धुपालनामानं प्राप्य, तत्सुतायां बाल-

चन्द्रिकायामनुरक्तः। सा बालचन्द्रिका राजकुमारेण दारुवर्मणोढव्याऽऽसीत्। परं सा तं हिंसककर्मभिः नैवानुरज्यत।

पुष्पोद्भवपरामर्शेन बालचन्द्रिकाकथयत् दारुवर्मा हि यक्षेणाक्रान्तः। अहं च तमेवोद्वहिष्यामि यः तं यक्षोन्मुक्तं करिष्यति। पुष्पोद्भवो बालचन्द्रिकासख्या वेषं धृत्वादारुवर्मवधं घोषयामास-यद् दारुवर्मा यक्षेणहतः। पुष्पोद्भवो बालचन्द्रिकया सह कुत्रापि निष्क्रान्तः। तत्र चोपयेमे बालचन्द्रिकाम्। शकुनज्ञो बन्धुपालो राजाहनागमनं सूचयामास। एवं राजवाहनः, सोमदत्तपुष्पोद्भवाभ्यां सह ब्राह्मणवेषंधृत्वा उज्जयिनीनगर्यां राजमन्दिरे सुखेन वस्तुमुपचक्रमे।

पञ्चम उच्छ्वासः – उज्जयिनी निवासे राजवाहनः पितू राजहंसस्य शत्रोर्मानसारस्यानुपमसुन्दरीं सुतामवन्तिसुन्दरीमालोकत। दृष्टिपाते परस्परं तौ सहसैवानुरक्तावन्योन्यौ। मानसारश्च राज्यं दर्पसारेऽर्पितवान्। दर्पसारोऽपि तद्राज्यं दारुवर्मचण्डवर्मभ्यां समार्पयत्। तयोर्दारुवर्मा पुष्पोद्भवेन हतः। राजवाहनोऽवन्तिसुन्दरीं साक्षादग्निसम्मुखे उपयेमे। परं दृश्यमेतद् विवाहस्यैन्द्रजालिक इन्द्रजालमेवावर्णयत्। अवन्तिसुन्दरी प्रियसहचरीभिः सह वल्लभेन राजवाहनेन सह मन्दिरं ययौ।

एवं दैवमानुषबलेन मनोरथसाफल्यमुपेतो राजवाहनोऽवन्तिसुन्दर्या सह रतिसुखमनुभवन् तां चतुर्दशभुवनवृत्तान्तान् श्रावयामास।

X

दशकुमारचरितनामको मध्यभागः

प्रथम उच्छ्वासः – ब्राह्मणवेषधारी राजवाहनोऽवन्तिसुन्दरी च किंचित्कालानन्तरं चण्डवर्मानुचरैरभिज्ञातौ। यदा च स त स्वभ्रातुर्दारुवर्मघातकःपुष्पोद्भवसखायं प्रत्यभ्यजानात्, तदा तमभियोक्तुं सहसैवोपचक्रमे। परं सम्राजा मानसारेण प्रतिषिद्धः सः तौ काष्ठपिञ्जरे तावदवरुरोध यावद्दर्पसारस्यादेशो न प्राप्यते।

अस्मिन्नेवान्तराले चण्डवर्मा अंगराजं सिंहवर्माणं प्रतियोद्धुं जगाम, तत्पुत्रीं स्वपत्नीं विधातुम्। काष्ठपञ्जरे निमग्नो राजवाहनोऽपि सैनिकैः सह गतः। चण्डवर्मा सिंहवर्माणं युद्धे पराजित्य तत्सुतया सह तं वन्दिनमकरोत्। दर्पसाराज्ञया राजवाहनाभियोगो निर्दिष्टः। हस्तिपदेन च तस्य वधादेशो दत्तः। यथैव राजवाहनः शृङ्खलाभिर्बद्धः तदैव सर्वत्रोद्घोषः संजातो यदृषिणा काप्यप्सरा शप्ता।

एतदन्तरे राजवाहनस्तु मुक्तः परं राजवाहनमित्रेणापहारवर्मणा चण्डवर्मा हतः। सिंहवर्मणा च स्वसाहाय्यार्थं ये सखायो राजपुरुषा वाऽऽहूताः। ते सर्वे तत्र सम्प्राप्ताः। परं ते सर्वे राजवाहनस्यैव वियुक्ताः सहचारा राजसुता वाऽऽसन्। तदा ते सर्वे स्वस्वयात्रां राजवाहनसमक्षमुपवर्णयायासुः॥ तत्र प्रथम अपहारवर्मा वर्णयति —

द्वितीयः उच्छ्वासः — स्वयात्रा| परिभ्रमन्नपहारवर्मा मराचिनामानं तापसमेकं राजवाहनसमाचारान् ज्ञातुमुपायमपृच्छत्। तापसो मरीचिस्तममुपायान् वर्णयितुं प्रतिज्ञातवान् चम्पायां च वस्तुं तमादिदेश। मरीचिः स्ववृत्तमेवमुपवर्णयति - काममञ्जर्या नाम्न्या वेश्यमाहं वञ्चितः। मरीचितपोवने नक्तमेकं यापयित्वा चम्पां प्रति चलितः। तत्र च स काममञ्जर्यावञ्चितं भिक्षुरूपे च प्रापितं विमर्दकं सखायमकरोत्। अपहरवर्मा तत्साहाय्यं कर्तुं प्रत्यजानात्। द्यूतकरः छिद्रान्वेषी तस्करः चाभवत्।

अस्मिन्नन्तराले अपहारवर्मा कुलपालिकां नाम्नीं नारीं दृष्टवान्। या धनमित्रेऽनुरक्ताऽऽसीत्। परं कुलपालिकाया जनकः कुबेरदत्तो दानशीलत्वान्निर्धनतां गतेन तेन सह तस्या विवाहं निषिध्यार्थपतिना सह तद्विवाहं कर्तुमियेष। कुलपालिका रात्रौ धनमित्रगृहं गच्छन्ती दृष्टाऽपहारवर्मणा। स तत्सहयोगं कर्तुं प्रतिज्ञाय, तां तत्प्रेमिसमीपे नीतवान्। तौ द्वौ कुवेरदत्तपार्श्वे गत्वा तद्गृहमलुण्ठताम्, तदैवार्थपतेर्गृहमपि लुण्ठितम्म्।

कुलपालिकाधनमित्रयोर्विवाहो मासमेकं निषिद्धः। अपहारवर्मा स्वदस्युकृत्यैर्धनमित्रं धनिनमकरोत्। सर्वत्र चोदघोषितं यत् धनमित्र इन्द्रजालेन चर्ममञ्जूषया वा प्रतिदिवसं धनं प्राप्यते। कुबरदत्त श्रावं श्रावमिदं धनमित्रेण सह कुलपालिकाया विवाहमकरोत्।

अपहारवर्मा काममञ्जर्या लघुभगिन्यां राजमंजर्यामनुरक्तः। स काममंयर्था इदमाश्वासनं प्राप्नोत् यत् स तस्यै चर्ममञ्जूषां, इन्द्रजालं वा प्रापयिष्यति येन प्रतिदिवसं धनं प्राप्यते। परं सा तत्सर्वं धनं तेभ्यो जनेभ्यो दास्यति यान् सा पूर्वं वञ्चिवती। एवं विमर्दकः पुनर्धनिकः संजातः। काममञ्जरी चर्ममञ्जूषां लब्धवती।

धनमित्रो राजानं स्वचर्ममञ्जूषास्तेयमसूचयत्। अपहारवर्मादिशानुसारेण तां मञ्जूषां काममंजरी इदं कथयित्वा प्रतिददौ यदेषाऽर्थपतिना तस्यै प्रदत्ता। अस्मादपराधाद् अर्थपतिर्नगरान्निष्क्रामितः तत्सम्पत् च राज्यसम्पत् कृता।

एकदा रात्रौ अपहारवर्मा राजपुरुषान् आक्रामत्। कारागारे च प्रक्षिप्तः। अम्बालिकायामनुरक्तः कारागाराध्यक्षः कण्टकः कारायाः राजप्रासादपर्यन्तं पृथ्वीमार्गं कारयितुममपहारवर्मणः सहयोगं प्राप। अपहारवर्मा मार्गं निर्माय, मध्ये च कण्टकं हत्वा राजकुमारीमंबालिकां प्रत्यनुरक्तः। अम्बालिकां सुप्तां विहाय च गतः। चण्डवर्मा चम्पामाक्रम्य यदाऽम्बालिकां प्राप्तुं तत्पितरं बन्दिनं कृत्वा स्वकार्यं साधायितुमियेष अपहारवर्मा तस्य वधमकरोत्। तदा मरीचिभविष्यवाण्या राजवाहनसमीपमगात्।

तृतीय उच्छ्वासः – उपहारवर्मा राजवाहनमन्वेष्टुं विदेहं गच्छति। तत्र स स्वधात्र्या स्वपितुः शत्रोर्विकटवर्मणः तद्भ्रातृणां च पराक्रमान्

शृणोति। कथं विकटवर्मणा तस्य पितरौ कारागारेनिक्षिप्तौ। उपहारवर्मा स्वधात्रीदुहित्रा पत्या पीड़ितां विकटवर्ममहिषीं वशवर्तिनीं विदधाति। उपहारवर्मपरामर्शेन विकटवर्ममहिषी स्वपतिमैन्द्रजातिकमाध्यमेन सुन्दरं नूतनशरीरं प्राप्तुं प्रेरयति। वृद्धराजंशरीररूपान्तरणछलेनोपहारवर्मा विकटवर्मवधमकरोत्। सर्वान् तदमात्यान् च छलयित्वा स्वपितरं विदेहराजानं निर्माय स्वयं युवराजपदमधात्।

यदा स राजवाहनं चम्पायाममिलत तदा तस्य सहायर्तार्थं सैनिकप्रयाणमप्यकरोत्।

चतुर्थ उच्छ्वासः – अत्रार्थपतिः स्वकथा वर्णयति। स काशीं सम्प्राप्तः पीड़ितमेकं जनमपश्यत्। स काशीनरपतेः मन्त्रिणः कामपालस्य वर्णनमब्रवीत्। यं स तारावलीपतिं स्वपितरमेवाजानात्। वृद्धेन काशीराज्ञा चण्डसिंहेन सोऽमात्यपदे नियुक्तः परं नूतनेन राज्ञा सिंहघोषेणान्यायप्रयेण कामपालो मन्त्रिपदाच्च्यावितः वधार्थं चादिष्टः। अर्थपालः स्वपितरं मृत्युमुखात्त्रातुं सन्नद्धः।

स एकं विषयुक्तं सर्पं स्वपितुरुपरि तदाक्षिप्तवान् यदा स पाशबद्धो वधार्थमनीयत। कामपालो सर्पदंशेन यदा निःसंज्ञो बभूव तदैव चाण्डालैः परित्यक्तः। एवं पुनः विषसंहारकैरौपधैः स्वपितरं संज्ञायुक्तं विधाय सिंहधोषवधार्थं योजनामरचयत्। सः पृथिवीगर्मे मार्गमेकं विधाय प्रासादं प्राप्तवान्। यत्र सिंहघोषपुत्री राजकुमारी मणिकर्णिका विश्रान्ता। सिंहघोषसेवकाः अर्थपालं मणिकर्णिकामुदवोढं प्रार्थयामासुः। अर्थपाल इदं स्वीकृत्य शयानं सिंहघोषं कामपालसमीपं निनाय। सिंहघोषवधान्तरं कामपालो राज्यमारूढः, अर्थपालो यौवराज्यपद्वीमारुह्य मणिकर्णिकया विवाहं कृत्वा, चम्पायां राजवाहनेन संयुक्तो अंगराजसाहाय्यं सेनाप्रयाणमकरोत्।

पञ्चम उच्छ्वासः – प्रमतिरत्र स्वसाहसिकीं कथां वर्णयति – एष स्वयात्रां प्रारभ्य विन्ध्यपर्वततलेषु, तपोवनरक्षकरूपेण तरुतले विश्रान्तः। निन्द्रामग्न एवैष दैववशात् प्रासादमेकं प्राप्य, सुन्दरीमेकां कुमारीं दृष्ट्वैव तस्यामन्वरज्यत। जागृतः सन् स्वप्नो वा यथार्थो वेति चिन्तयन् एकयाप्सरसा स संज्ञापितः यत् तत्सर्वं सत्यम्। ययैव त्वं श्रावस्त्या राजकुमार्याः

समीपे नीतः। एषाऽप्सरा कामपालपत्नी यक्षकन्या तारावल्येवावर्तत। या स्वाभियोगे कृत्यपूर्णा यात्रार्थमगात्।

प्रमतिः श्रावस्तीं प्रति प्रचलितः मार्गे कुक्कुटयुद्धे स ब्राह्मणेनैकेन सौहर्दं नीतः। प्रमतिब्राह्मणौ योजनाबद्धौ। ब्राह्मणः प्रमतिं स्वपुत्र्या वेषे राज्ञः समीपे नीत्वा तत्संरक्षणे साममुञ्चत्। प्रमतिस्तत्र नवमालिकायामनुरक्तः। एकदा स प्रासादान्निर्गत्य ब्राह्मणं प्राप। ब्राह्मणः प्रमतिसहायः राजानं प्राप्य तेन सह स्वपुत्र्या विवाहं कर्तुं तत्पुत्रीमयाचत्। यदा राजा तत्पुत्रीं प्रदातुमसमर्थस्तदा ब्राह्मण आत्मानमग्निसात्कर्तुं प्रादर्शयत्। राजा तदा स्वपुत्रीं नवमालिकामेव प्रमतिपत्नीरूपेणादात्, सान्त्वयामास च ब्राह्मणम् एवं प्रमतिः राज्ञोजामाना सन् तस्य विश्वस्तो भूत्वा यदा सिंहवर्मणः साहाय्यार्थं सेनाप्रयाणं व्यधात्, तदा स्वमित्रं राजवाहनमाप।

षष्ठ उच्छ्वासः – मित्रगुप्तस्य कथाकालोऽधुना। सुह्मदेशं गच्छन् तद्राजधा दामलिप्तां प्राप्तः। सुह्मराट् दुर्गाया आशिषा भीमधन्वानं नामसुतं, कन्दुकावतीं सुतां चाऽसूत। दुर्गायाः पणमासीत्, भीमधन्वा कन्दुकावतीपतेरनुचरोभवतु, तथा कन्दुकावती वार्षिके समारोहे कन्दुकेन क्रीडन्ती स्ववरमन्विच्छतु। वार्षिके समारोहे कन्दुका वत्या मित्रगुप्तो वरत्वेन स्वीकृतः। परं भीमधन्वा तेनापरिचितेन सह तद्विवाहार्थं न संसक्तः। अतो मित्रगुप्तस्तदादेशेन सागरेक्षिप्तः। दैववशात् यवनपोतेन त्रातः। यवनास्तं सेवकत्वेन रक्षितुमवाञ्छन्, परं तदैव तद्वाहनमाक्रमकैराक्रान्तम्। मित्रगुप्तः प्राणपणेन तान् सर्वान् ररक्ष तदा तैः स्वतन्त्रतां नीतः सः। आक्रामकपोतस्य चाध्यक्ष आसीद् भीमधत्वा, स तैः बन्दीकृतः। पोतः सोऽकस्माद्वात्याबलेनैकस्मिन् विपरीतदिग्द्वीपे नीतः। यदा स तत्र संस्थापितो मित्रगुप्तश्च समुद्रवेलां संप्राप्तः, तदैव केनापि राक्षसेनाक्रान्तः।

राक्षस उवाच यदि त्वं मम चतुरः प्रश्नान् नोत्तरिष्यति, त्वां निगलिष्याम्यहम् ते चेमे सन्ति -

१. प्राकृतिकः किम् ?

२. गृहस्थस्य सुखाय कः सर्वथोपक्रमते ?

३. प्रेम च किम् ?

४. क्लिष्टवस्तूनि प्राप्तुं किं साधनं श्रेष्ठम् ?

मित्रगुप्तः प्रत्येकं प्रश्नस्योत्तरमकथयत्

१. नारीहृदयम्।

२. पत्नीगुणाः।

३. प्राप्तुं दृढनिश्चयः।

४. प्रतिभा

एवं च चतुरः प्रश्नान् पृथङ्नायिकायुक्तया कथयोदतीतरत्। यद्यथा-प्रथमकथानायिका - धूमिनी। द्वितीयकथानायिका - गोमिनी। तृतीयकथा-नायिका - निम्बावती। चतुर्थकथानायिका - नितम्वावती।

राक्षसः प्रसादमधिगतः।

तदैव गगनतल एकोऽन्यो राक्षस कुमारीमेकां बलादनयत् स राक्षसो मित्रगुप्तेन हतः। सा च कुमारी कन्दुकावती मित्रगुप्तवधूरेवासीत्। मित्रगु-प्तप्तस्तदा समुद्रमार्गेण सुह्मराजधानीं दामलिप्तां संप्राप्तो वृद्धराज्ञा च जामातृरूपे सम्मानितः। एष सिंहवर्मसहायक आसीत्। अतो मित्रगुप्तः सेनाप्रयाणेन प्रेपितो यत्र च चम्पायां स राजवाहनेन संयुक्तः।

सप्तम उच्छ्वासः — मन्त्रगुप्तः स्वचरितं चित्रयति।

मन्त्रगुप्तः राजवाहनान्वेषणतत्परः कलिङ्गं जगाम। तत्र स कलिंगराज-पुत्रीं कनकलेखामरक्षत्; यस्या वलिं दत्वा कश्चित् सिद्धः प्रौढाः शक्तीर्ल-ब्धुममवाञ्छत्। ततो मन्त्रगुप्तस्तां तत्प्रासादमनयत्। तस्यामासक्तो मन्त्रगुप्तः परोक्षरूपेण तत्प्रसादेऽवसत्। कर्दनो नाम कलिङ्गराजः स स्वपरि-वारेण सह समुद्रतटे कमपि समयमतिवाहयितुं जगाम। तत्र स आन्ध्रराजेन जयसिंहेनाक्रान्तः, वन्दी च कृतः। आन्ध्रनाथः कनकलेखां बलादुद्वोढुमै-च्छत्। परं सर्वत्र प्रवादो विस्तृतो यत्कनकलेखा केनापि यक्षेणाक्रान्ता। स यक्षः पूर्वं तद्देहान्निसारयितव्यः।

मन्त्रगुप्तः सन्यासिवेषं धारयित्वा कालिङ्गराजं कर्दनं यक्षं निःसारयितुमुवाच। स जयसिंहं सरोवर एकस्मिन् स्नातुयादिदेश। मन्त्रगुप्तस्यैन्द्रजालिकैर्मन्त्रै रूपान्तरं प्रापितः स यक्षं कनकलेखाशरीरान्निस्सारयितुं समर्थः स्यात्। जयसिंहः सरोवरं सन्निविष्टः। मन्त्रगुप्तश्च रूपान्तरं प्राप्य तं जयसिंहमहन्। मन्त्रगुप्त एवं कर्दनं बन्दिगृहाद् विमोच्यान्ध्रकलिङ्गयो राजत्वं प्राप्य कनकलेखामुपयेमे।

सिंहवर्मसाहय्यार्थमागतः सोऽपि राजवाहनेन संयुक्तः।

अष्टम उच्छ्वासः — अन्तिमे प्रसङ्गे विश्रुतस्स्वकृतं श्रावयति।

विन्ध्याटवीपर्वत आहिण्ड्यमान एष बालस्य रक्षकेणैकेन वृद्धेन संसर्गमाप। एष बालो विदर्भराजकुमार आसीत्। अनन्तवर्मा नाम विदर्भराजोऽस्य जनको दुर्व्यसनैर्मित्रैः संविष्टो राज्यं नापालयत्। ततः स समीपवर्तिना राजकुमारेण वसन्तभानुनाऽऽक्रान्तो न केवलं हतः, तद्राज्यमपि तेन स्वीकृतम्। अनन्तवर्मणि परलोकमधिगतवति तन्महिषी वसुन्धरा स्वपुत्रेण भास्करवर्मणा पुत्र्या मञ्जुवादिन्या च सह मित्रवर्माणं नाम माहिष्मतीराजं स्वपतिभ्रातरमाशिश्रिये।

मित्रवर्मा तत्पत्यर्धातकमित्र आसीत्। अतो वसुन्धरा स्वसुतं वृद्धेन संरक्षितं कृत्वा सुरक्षितस्थाने सम्प्रेपितः। विशुत् सर्वमतेदाकर्ण्यात्मानं राजकुमारसम्वन्धिनं ज्ञात्वा तन्नष्टराज्यं पुरधिगन्तुं प्रतिज्ञातवान्। तदैव विश्रुतः श्रुतवान् यन्याहिष्मत्यां मित्रवर्मा म्ञ्जुवादिनीप्रचण्डवर्मणोर्विवाहं कारयितुं प्रवृत्तः। विश्रुतः तं वद्धं बालसहायकमसत्यप्रचारं कर्तुंप्रेपितवान् यदनन्तवर्मसुतः स्वर्गं समारूढः। मित्रवर्मवधार्थं च स एकं सविपं हारं प्रेपितवान्। मित्रवर्मवधानन्तरं च विश्रुतं तत्र प्रतीक्षताम्।

सत्वरं विश्रुतो योगिवेपे राजकुमारेण सह प्राप्तः। प्रचण्डवर्मवधार्थं च दुर्गामन्दिरपुनर्निर्माणव्याजेन, दुर्गामूर्त्तिपादं प्रविष्टः। राज्ञी वसुन्धरा मृतस्य सुतस्य स्थाने जीवितं पुत्रमधिगमिष्यति इत्यादिष्टा तत्र समाजगाम विश्रुतो राजकुमारसहितो दुर्गामन्दिरान्निष्क्रान्तोऽवदत् सुतोऽयं दुर्गासंरक्षणे सुरक्षितः आसीत्। एप एव प्रजानां न्यायिकः सम्राट्ः।

एवं भास्करवर्मा माहिष्मतीसम्राड्रूपेणधिष्ठापितः। विश्रुतो मञ्जुवादिनीमुपयम्य भास्करवर्मणः परामर्शदातृपदमधिरूढः।

उत्तरपीठिका

विश्रुतो भास्करवर्माणां तन्नष्टराज्येन संयोक्तुमपचक्रमे। स वसन्तभानुमाक्रम्य विदर्भराज्ये पुनः तमधिरोपयामास। सिंहवर्मसाहाय्यार्थमागतः सोऽपि राजवाहनेन संयुक्तः।

एवं सर्वेषु वृत्तेषु वर्णितेषु राजवाहनपितू राजहंसस्य सन्देशवाहकः पत्रेणैकेन सह समागतः। तत्र लिखितमासीत् राजहंसः पुत्रवियोगेन महिषीवियोगेन च शोकाकुल आसीत् परं वामदेवेन तापसेन स समादिष्टो यत्षोडशवर्षानन्तरं सर्वराजकुमाराः परावर्तिष्यन्ते। कालोऽयं परिसमाप्तः वामदेवेन चेदमप्याज्ञप्तं यत्ते सर्वे चम्पानगर्यां सम्मिलिताः। अधुना ते सर्वे राजहंसं द्रष्टुं शीघ्रमेव प्रचलेयुः। सन्देशमिमं प्राप्यैते राजकुमारा पुष्पपुरीं प्रत्युज्जग्मुः। उज्जयिनीमधिगत्यमानसारं परलोकगामिनं कृत्वा ते मालवाराज्यमधिगवन्तः।

राजहंसोऽतीव सन्तुष्टः प्रत्येकं राजकुमाराय ततज्जितं राज्यं समर्प्य विश्रान्तिं समधिगतः। राजवाहनः पुष्पपुरस्य उज्जयिन्याः च साम्राज्यं पालयामास। राजकुमाराश्च न्यायेन स्वस्वराज्यं शासतः ससुखं जीवनं व्यतियापयामासुः।

XI

दण्डिनो दशकुमारचरितस्य मूलस्त्रोतः

दण्डी गुणाढ्यमनुकृत्यैव कथारूपं कथाक्रमं च विकासयति। दशकुमारचरिते स्पष्टतो गुणाढ्यस्य वृहत्कथाया वोल्लेखो नैव। परं दशकुमारचरितस्य प्रथमोच्छ्वासे सुरतमञ्जरी वर्णयति यद् वेगवतः पौत्रो मानसवेगस्य पुत्रो वीरशेखरो विद्याधरसम्राजः सन्तानस्य शत्रुरासीद, अनेन वृत्तान्तेन सिध्यति दण्डिगुणाढ्ययोः परस्परसंबन्धः।

बृहत्कथाकथासु यथा नरवाहनदत्तसहचरा परस्परं विचित्राणां घटनानां साहसिककृत्यानां च वर्णनं कुर्वन्ति तथैव दशकुमारचरितस्य पात्राणि कुर्वन्ति।

एम. आर. काले[१] महोदयोऽपि विवरणमस्येत्थं प्रस्तौति। दशकुमारचरितं वस्तुतो दण्डिन एव कृतिः। अस्य स्वरूपं च न केनापि पूर्वोत्तर वर्तिना प्रभावितम्। तथापि दण्डी यथाकथंचित् कुतोऽपि पौराणिकात्, प्रचलितपरम्पराभ्य इतिहासकथानकेभ्योवा किंचित् स्रोतो गृहीतवान्। तच्च स्रोतो गुणाढ्यास्य बृहत्कथाया अन्यत्किमापि न सम्भवति। प्रायशो भारतीया अनेके लेखका गुणाढ्यात् कथाबिन्दून् गृहीतवन्तः।

कथासरित्सागरे, वृहत्ककथामञ्जर्यां वा विद्यमानेन बृहत्कथायाः स्वरूपेण न दृश्यते कोऽपीदृशोऽशो यो हि दण्डिना गृहीतः स्यात्। परं दशकुमारचरितबृहत्कथयोः सन्ति कोचित्प्रदेशाः यानवलोक्य दशकुमारचरिते गुणाढ्यस्य प्रभावो लक्ष्यते।

आगाशे महोदय इदृशान् अंशान् एवमुद्धरति। तत्र प्रथमोऽस्ति - वेश्यामाता स्वपुत्र्या सहापत्तिं प्रकटयति -

---

१ एम.आर.काले. - दशकुमारचरितभूमिका पृ.३९, मोतीलाल बनारसीदास १९६६

"भगवन् अस्या मे दोषमेषा वो दासी विज्ञापयति। दोषाश्चमम स्वाधिकारानुष्ठापनम्। एष हि गणिकामातुरधिकारो यद्दुहितुर्जन्मनः प्रभृत्येवाङ्गक्रिया, तेजोबलवर्णमेधासंवर्धनेन दोषाग्निधातुसाम्यकृता मितेनाहारेण शरीरपोषणम्, आ पञ्चमाद्वार्षात्पितुरप्यनतिदर्शनम्, जन्मदिने पुण्यदिने चोत्सवोत्तरो मङ्गलविधिः अध्यापनमनङ्गविद्यानां साङ्गानाम्, नृत्यगीतवाद्यनाट्यचित्रास्वाद्यगन्धपुष्पकलासु लिपिज्ञानवचनकौशलादिषु च सम्यगविनयनम्, शब्देहतुसमयविद्यासु वार्त्तामात्रावबोधनम्, आजीवज्ञाने क्रीड़ाकौशले सजीवनिर्जीवासु च भूतकलास्वभ्यन्तरीकरणम्, अभ्यन्तरकलासु वैश्वासिकजनात्प्रयत्नेन प्रयोगग्रहणम्, यात्रोत्सवादिष्वादरसाधिताया सफीत्परिबर्हायाः प्रकाशनम्, प्रसङ्गवत्यां संगीतादिक्रियायां पूर्वसंगृहीतैर्ग्राह्यवाभिः कल्याणलक्षणोद्धोषणम्, पीठमर्दविटविदूषकैर्भिक्षुक्यादिभिश्च नागरिक पुरुषसमवायेषु रूपशीलसौन्दर्यमाधुर्यप्रस्तावना गणिकायाश्च गम्यं प्रतिसज्जतैव न प्रसङ्गः। सत्यामपि प्रीतौ न मातुर्मातृकाया वा शासनातिवृत्तिः।

एवं स्थितेऽनया प्रजापतिविहितं स्वधर्ममुल्लङ्घ्य क्वचिदागन्तुके रूपमात्रधने विप्रयूनि स्वेनैव धनव्ययेन रममाणया मासमात्रमत्यवाहि। गम्यजनश्च भूयानर्थयोग्य प्रत्याचक्षाणया अनया प्रकोपितः। स्वकुटुम्बवं चावसादितम्। 'एषा कुभितिर्न कल्याणी'। इति निवारयन्त्यां मयि वनवासाय कोपात्प्रस्थिता। सा चेदिमहार्यनिश्चया सर्व एव जनोऽत्रैवानन्यगतिरनशनेन संस्थास्यते इत्यरोदीत्।[१]

एकस्या नार्याः पादान्नूपुरस्याक्षेपणम्, यथा -

"सा तथैवोपपादितवती। सोऽतिप्रीतस्तस्यामे वक्षपायां वृक्षवाटिकागतो नितम्बवतीं निग्रन्थिका प्रयत्नेनोपनीतां पादे परामृशन्निव हेमनूपुरमेकमाक्षिप्य च्छुरिकयोरुमूले किंचिदालिख्य द्रुततरमपासरत्।"[२]

राजकुमारस्यपहारवर्मणः पातालदेशगमनम् - यथा

---

१ दशकुमारचरितम् - एम.आर.काले पृ. ६६-६८

२ दशकुमारचरितम् एम.आर.काले पृ.१६९

"देव ! त्वयि तदाऽवतीर्णे द्विजोपकारायासुरविवरं त्वदन्वेषणप्रसृते च मित्रगणेऽहमपि महीमटन्नङ्गेषु गङ्गातटे बहिश्चम्पाया काश्चिदस्ति तपः प्रभावोत्पन्नदिव्यचक्षुर्मरीचिर्नाम महर्षिः इति कुतश्चित्संलपतो जनसमाजादुपलभ्यामुतो बुभुत्सुस्त्वद्गतिं तमुद्देशमगमम्।"[१]

परमांदृशं वर्णनं निश्चयेन दण्डिनो मौलिकतां नैवापकर्षति।

इदममपि कथ्यते 'राजहंसस्य राजवर्णनम्' 'मानसारस्य तस्योपर्याक्रमणम्', 'वसन्तभानोश्च राज्यभ्रंश' एतादृशः प्रदेशाः कमप्यैतिहासिकवृत्तमनुकुर्वन्ति, परं दण्डिनोऽन्तः साक्ष्येण नेदृशं किञ्चिदाभासते। वस्तुतो दण्डी कान्यप्यैतिहासिकवृत्तानि नैवोल्लिखति, नैव च प्रमाणयति। दशकुमारचरितं तस्य निजकल्पनाया एव वृत्तम्।

दण्डी तात्कालिकस्य समाजस्य, मध्यवर्गस्य, राजकीय शासनस्य च चित्रं स्वयमेव स्वकीयतूलिकया चित्रितवान्। दण्डी मौलिकलेखकरूपेण कथाविवरणमेवोदलिखत्। अतो दशकुमारचरिते उपदेशप्रवृत्तिर्न कुत्रापि दृश्यते। कथाविवरणाय सरला गतिशीला भाषाऽनिवार्या। दण्डी च कारणेनानेन गुणाढ्यस्य मनोहारिणीं शैलीमेवान्ववर्तत।

दशकुमारचरितस्य मुख्योद्देश्यमासीत्जनजीवनचित्रणम्। यत्र हि निर्धनधनिनोः बीरकातरयोः, विद्वदविद्ययोः, लघुगुरुतरयोः सकलयोः चित्रणमस्ति। अतः सर्वथा निर्णेतुमलं यत् कथाया दशकुमारचरितस्य मूलस्रोतोऽस्ति यदि तर्हि तत्केवलं गुणाढ्यस्य बृहत्कथैव नान्यत् किमपि।

---

१ दशकुमारचरितम् - एम.आर.काले पृ.६४

XII

दशकुमारचरित कथाया रूपाणि शापपुनर्जन्मनो वृत्तानि

संस्कृतगद्यकारस्य दण्डिनो गद्यलेखनस्य महती विशेषताऽस्ति कथानां सततं प्रवाहोऽन्तःस्यूतत्वं च। अत्र बह्वीनामुपकथानां नैरन्तर्यमस्ति। मुख्य-कथायाः दर्शनमन्तः कथाभ्यः पृथग्विवरणं चातीव महत्त्वपूर्णं जायते। मुख्यकथाया गतिरतीव शिथिला जायते। यतो हि पाठका अप्युपकथसु निमग्नाः अन्तः कथानां मध्ये विवशा भवन्ति ज्ञातुं, का हि मुख्या कथा, का चान्तः कथा।

एतासां कथानां रूपं तदान्यदपि विकटं जायते, यदा तासां मध्ये पात्राः शापग्रस्ता भवन्ति, पुनर्जन्म वा धारयन्ति। उदाहरणतः — उपहार-वर्मकल्पसुन्दर्यौं पूर्वजन्मनि, उपहारवर्मा तु गणेशः, कल्पसुन्दरी चतस्य ि-वमाता गङ्गाऽभवत्। एकदा कुपिता गङ्गा गणेशं मनुष्योनौ जन्म ग्रहीतुमशपत् तर्हि गणेशोऽपि गङ्गां मनुष्ययोनावुत्पत्तेः शापमददात्। तावेव च पुनः उपहारवर्मकल्पसुन्दर्यो रूपेणोत्पन्नौ[१]।

---

१ सौम्य उपहारवर्मन् ! मास्य ते दुर्विकल्पोभूत्। यस्त्वमसि मदंशः। शङ्करजटाभारलालनोचिता सुरसरिदसौ वरवर्णिनी। सा च कदाचिन्मद्विलोडनासहिष्णुर्मामशपत् एहिमर्त्यत्वम् अशप्यत मया च — यथेह बहुभोग्या तथा प्राप्यापि मानुष्यकमनेकसाधारणी भव इति। अभ्यर्थितश्चानया एकपूर्वा पुनस्त्वामेवोपचर्य यावज्जीवं रमय इति। तदयमर्थो भव्य एव भवतानिराशङ्क्यः इति प्रतिबुध्य च प्रीतियुक्तस्तदहरपि प्रियासङ्केतव्यतिकरादिस्मरणे नाहमनैपम्। दशकुमारचरितम् - उत्तरपीठिका तृतीयोच्छ्वासः पृ.२३१ चौ.सं.सीरीज़

अर्थपालस्य कथायां पुनर्जन्मवृत्तं वर्तते

प्रथमे जन्मनि — यक्षराजस्य कुबेरस्यादेशेन गोपकन्याया विवाहः शौनकेनर्षिणा सह संजातः।

द्वितीये जन्मनि — शौनकः शूद्रकः गोपकन्या चार्यादासी भूत्वा दम्पती अजायेताम्।

तृतीये जन्मनि — शूद्रकः कामपालः आर्यादासी च कान्तिमतीरूपे जनिं लेभे। एतौ द्वावस्मिञ्जीवनेऽपि पतिपत्न्यौ आसाते।

एवं कामपालशूद्रकशौनकर्षयः एके, कान्तिमती आर्यादासी गोपकन्या चैके, जन्मजन्मनि साहचर्यमुपगतौ[१]।

प्रमतिजन्मनि च दृश्यते तादृश एव जन्मजन्मान्तरघटनाचक्रम्। मरीचिसोमदत्तावपि जन्मजन्मान्तरसम्बद्धौ।

---

१ अथाहमाज्ञप्ता हरसखेन, बाले बालेऽस्मिन्कीदृशस्ते भावः इति। 'औरस इवास्मिन् वत्से वत्सलता' इति मया विज्ञापितः सत्यमाह वराकी इति तन्मूलामतिमहतीं कथामकरोत्। तत्रैतावन्मयाऽवगतम् त्वं कि शौनकः शूद्रकः कामपालश्चाभिन्नः। बन्धुमती विनयवती कान्तिमती चामिन्ना। वेदिमत्यार्यदासी सोमदेवी चैकैव। हंसावली शूरसेना सुलोचना चाऽनन्या। नन्दिनी रङ्गपताकेन्द्रसेना चापृथग्भूता। या किल शौनकावस्थायामग्निसाक्षिकमात्यसात्कृता गोपकन्या सैव किलार्यदासी पुनश्चाद्य तारावलीत्यभूवम्। बालश्च किल शूद्रकावस्थे त्वय्यार्यदास्यवस्थायां मय्युदभूत्। अवर्ध्यत च विनयवत्या स्नेहवासनया। स तु तस्यां कान्तिमत्यवस्थायामद्योदभूत्। एवमनेकमृत्युमुखपरिभ्रष्टं दैवान्मयोपलब्धं तमेकपिङ्गादेशाद्वने तपस्यतो राजहंसस्य दैव्यै वसुमत्यै तत्सुतस्य भाविचक्रवर्तिनो राजवाहनस्य परिचर्यार्थं समर्प्य गुरुमभिरभ्यनुज्ञाता कृतान्तयोगात्कृतान्तमुखभ्रष्टस्य ते पादपद्मशुश्रूषार्थमागतास्मि। दशकुमारचितम् - उत्तरपीठिका चतुर्थोच्छ्वासः पृ. २६६

किम्बहुना राजकुमारराजवाहनस्य अवन्तिसुन्दर्याश्च पूर्व जन्मपरिचयो लभ्यते। पूर्वजन्मनि राजवाहनः साम्बः, अवन्तिसुन्दरी च राज्ञी यज्ञवत्यासीत्।

एवं दण्डिनो दशकुमारचरिते शापपूर्वजन्मनोर्विविरणं स्थाने स्थाने घटनाचक्रमग्रेसरं विदधाति। वस्तुतः कथाक्रमे जिज्ञासात्वमुद्बोधयितुमहिशाः कथाप्रकारा अनिवार्याः। एभिः कथाक्रमैः पाठका सततमुत्सहन्ते, कथानकेऽग्रे किं भविष्यति।

दण्डिनोऽस्य शापवृत्तान्तस्य स्पष्टं स्पष्टं प्रभावो बाणे दृश्यते। अत एव कादम्बर्यां त्रयाणां जन्मनां कथा विवृता।

XIII

दण्डिन पात्राणां परिचयः स्वरूपं वा

दण्डी दशकुमारचरिते मुख्यतः पात्राणां साहसिककृत्यानां वर्णने संलग्नः। स तु तेषां तेषां पात्राणां मुख्या घटना एव विवृणोति, तेषां चरित्रस्य चित्रणे तु स गौणरूपतामवलम्बते। प्रणयात्मकग्रन्थानां कृतेऽनिवार्यमपीदमेव। अत एव च कस्यापि पात्रस्य पृथग्रूपेण चरित्रचित्रणस्य सम्बन्धे नायमुत्सुकः।

राजवाहनोऽत्र नायकत्वेन चित्रितः। स तरुणः शिक्षितः शरीरेण च सुन्दरः। तस्य ब्राह्मणसाहाय्यतत्परतां, तस्य हृदयस्यौदार्यं चित्रयति लेखकः।[१]

---

१ राजवाहनो मङ्गलसूचकं शुभशकुनं विलोकयन्देशं कंचिदतिक्रम्य विन्ध्याटवीमध्यममविशत्। तत्र हेतिहतिकिणाङ्कं कालायसकर्कशकायं यज्ञोपवीतेनानुमेयविप्रभावं व्यक्तकिरातप्रभावं लोचनपरुषं कमपि पुरुषं ददर्श। तेन विहितपूजनो राजवाहनोऽभाषत — ननु मानव ! जनसङ्गरहिते मृगहिते घोरप्रचारे कान्तारे विन्ध्याटवीमध्ये भवानेकाकी किमिति वसति। भवदंसोपनीतं यज्ञोपवीतं भूसुरभावं द्योतयति। हेतिहतिभिः किरातरीतिरनुमीयते। कथय किमतत्। 'तेजोमयोऽयं मानुषमात्रपौरुषो नूनं न भवति' इति मत्वा स पुरुषस्तद्वयस्यमुखान्नामजनने विज्ञाय तस्मै निजवृत्तान्तमकथयत्। राजनन्दन ! केचिदस्यामटव्यां वेदादिविद्याभ्यासमपहाय निजकुलाचारं दूरीकृत्य किल्विषमन्विष्यन्तः बहवो ब्राह्मणब्रुवा निवसन्ति। तेषु कस्यचित्पुत्रो मातङ्गो नामाहं सह किरातबलेन जनपदं प्रविश्य ग्रामेषु धनिनः स्त्रीबालसहितानानीयाटव्यां बन्धने निधाय तेषां सकल धनमपहरन्नुद्धत्य वीतदयो व्यचरम्। कदाचिदेकस्मिन् कान्तारे मदीय सहचरगणेन जिघांस्यमानं भूसुरमेकमवलोक्य दयायत्तचित्तोऽब्रवम् - 'ननु पापाः। न हन्तवयो ब्राह्मणः।'

अवन्तिसुन्दर्या सह तस्य संयोगः तस्य चण्डवर्मणा बदित्वे कारणमभूत्। एतत्सर्वं वीरत्वे, साहसत्वे, सत्यपि स सोठवान् यतोहि निर्दिष्टमासीदिदं पूर्वमेव दैवेन। यथा स किल चण्डशीलश्चण्डवर्मासर्वमिदमुदन्तजातं राजराजगिरौ तपस्यत दर्पसाराय सन्दिश्य सर्वमेव पुष्पोद्भवकुटुम्बकं सर्वस्वहरणपूर्वकं सद्य एव बन्धने क्षिप्त्वा कृत्वा च राजवाहनं राजकेसरिकिशोरकमिव दारुपञ्जरनिबद्धं यूर्धजजालविलीनचूड़ामणिप्रभावविक्षिप्तक्षुत्पपासादिखेदं च तमवधूतदुहितृप्रार्थनस्याङ्गराजस्योद्धरणायाङ्गनाभियास्यन्ननन्यविश्वासान्निनाय। रुरोध च बलभरदत्तकम्पश्चम्पाम्।[१]

प्रत्येकं राजकुमारस्य कथावृत्ते समाप्ते राजवाहनो यद्यद् वक्ति तेन तस्य सहृदयत्वमुदारत्वं च सूच्यते। स हि केवलं तेषां कथायाः सुगुणानेवावृणोति न तु तेषां कामपि न्यूनतां चरितापकर्षकतां वा।

यथैव च स स्वपितुः सन्देशमाकर्णयति सद्य एव गन्तुभारभते पितुः समीपं तस्य समाचारान्, जीवन-दशां च परिज्ञातुम्।[२]

अन्येषु च राजकुमारेषु सोमदत्तः कुशलो योद्धा, पुष्पोद्भवः कर्तव्यपरायणः पुत्रः, अपहारवर्मा आज्ञाकारी विश्वस्तः सखा, योजनाकारी च। राजवाहनः स्वयं तस्य प्रशंसां करोति। यथा—

श्रुत्वा च स्मित्वा च देवोऽपि राजवाहनः 'कथमसि कार्कश्येन कर्णीसुतमप्यतिक्रान्तः'

उपहारवर्मा कामं लेखकेन न तथा प्रशंसितः तथापि सोऽपि योजनादक्षः।

---

१ ऐम.आर.काले—दशकुमारचरितम् पूर्वपीठिका द्वितीयोच्छ्वासः पृ.५७

२ इत्येवं पितुराज्ञापत्रं मूर्ध्नि विधृत्य गच्छेमेति निश्चयं चक्रुः।—पुष्पपुरे राज्ञो राजहंसस्य देव्या वसुमत्याश्च पादान्नमस्यामः। एवं निश्चित्य स्व-स्वभार्यासंयुताः परिमितेन सैन्येन कालवेशं प्रति प्रस्थिताः।—तत्रैव पृ.२१५

अर्थपालोऽपि वीरः चतुरः संयोजकश्च। प्रमतिरुत्कृष्टस्वभाववान्, उदारैः कृत्यैरेव लक्ष्यपूरकः। मित्रगुप्तोऽतीव साहसिकः। यावनैः सह तस्य वीरकृत्यासि वस्तुतः प्रशस्यानि, राक्षसेन च तस्य प्रश्नोत्तराणि श्रेयांसि जीवनोपयोगीनि च।

मन्त्रगुप्तः साधनसम्पन्नः साहसिकः। विश्रुतश्च कुशलप्रशासकः, राजनीतिके व्यावहारिके चाभियाने कुशलः।

एवं राजकुमाराणां चरित्रचित्रणाद्भिन्नानां येषां येषां पात्राणां चरित्रं चित्रितं ते समाजस्य प्रत्येकं प्रदेशेभ्यो गृहीताः, अत एव च दशकुमारचरितमद्यापि तथैव मनोरंजकं यथाऽऽसीत् प्रणयनकाले। अत्र चित्रितानां पात्राणां परिचयं वयमेतद्रूपेण द्रष्टुं पारयामः।

राजा, राज्ञी, मन्त्री, युवराजः, तेषां परिचारकाः, परिचारिकाः, राजपरिवारसदस्याश्च। अत्रैन्द्रजालिकस्य विन्ध्येश्वरस्य इन्द्रजालकृत्यानि सर्वथा मनोरञ्जकान्याह्लादकानि च। धूर्तायाः काममंजर्या नाम्न्या वेश्यायाः छद्मकृत्यानि, तस्या एव भगिन्या रागमञ्जर्या तन्मातुः माधवसेनाया रोचकं चित्रणं मनोहारि कथाप्रसारकं च। अन्येषां समाजस्य क्षेत्राणां प्रतिनिधित्वं कुर्वन्ति— विरूपको जैनसाधुः, स्थापत्यकलामर्मज्ञः सुन्दरकः, द्यूतकरो विमर्दको-यो हि नगरस्य प्रत्येकं रथ्योपरथ्यादिभिः परिचितः, अर्थपतिरुदारकः, बौद्धभिक्षुणी धर्मरक्षिता या काममञ्जर्या दूतकार्याणि करोति, पाञ्चालकः, प्रमुखो वणिक् परित्रातः, यावनो वणिक् रवनतिः, पूर्ण विजयश्चौरः, ब्रह्मराक्षसः, अघोरी इत्यादिनि बहूनि पात्राण्यंत्रोपलभ्यन्ते।

एतानि सर्वाणि पात्राणि तात्कालिकसमाजस्य चित्रणं सुस्पष्टं जागरयन्ति। 'यथा नाम तथा गुणाः' इत्येवादर्शो दण्डिन आसीदेतेषां सर्वेषां पात्राणां चित्रणे।

वस्तुतः यादृशी कथा, तादृशानि पात्राणि। परस्परमेतयोः साम्यं दण्डिनः शैल्या आवर्जकत्वं साधयति। सर्वाणि पात्राणि यथासमयं मिलित्वा रसपोषणमपि कुर्वन्ति। एतेषु पात्रेष्वेकमीदृशमपि पात्रमस्ति, यत्कार्यं कियदपि निन्दितं स्यात् परं न तत्पात्रविहीनः समाजः कस्मिन्नपि युगे भवितुमर्हति। एतत् पात्रमस्ति वेश्या। एतस्या वर्णनं धर्मस्य, नीतेः, अर्थ-

विषयस्य वा ग्रन्थेषु सर्वत्रोपलभ्यते। भारतस्य प्राचीनसमाजे वेश्याया निजमेव स्थानमासीत्। विधि ग्रन्थेषु ताभ्यः पृथङ्नियमनिर्देशो दृश्यते। कौटिल्यार्थशास्त्रेऽपि तासामुपरि विविधविश्लेषणं वर्ण्यते। वात्स्यायनकामसूत्र एतासां विविधश्रेणीनां वर्णनमुपलभ्यते।

दशकुमारचरिते मुख्यतः काममंजरीनाम्न्याः पण्यवनिताया चरित्रं चित्रितम्। एषा काममंजरी वञ्चितवती मरीचिनामानमृषिम् तथाहि—

"आसीत्तादृशो मुनिरस्मिन्नाश्रमे। तमेकदा काममञ्जरी नामाङ्गपुर्यवतंसस्थानीया वारयुवतिरश्रुबिन्दुतारकितपयोधरा सनिर्वेदमभ्येत्य कीर्णशिखण्डास्तीर्णभूमिरभ्यवन्दिष्ट। तस्मिन्नेव च क्षणे मातृप्रमुखस्तदाप्तवर्गः सानुक्रोशमुप्रधावितस्तत्रैवाविच्छिन्नपातमपतत्। स किल कृपालुस्तं जनमार्द्रया गिराऽऽश्वास्यार्तिकारणं तां गणिकामपृच्छत्। सा तु सव्रीडेव सविषादेव सगौरवेव चाब्रवीत्—" भगवन् ! ऐहिकस्य सुखस्य भाजनं जनोऽयमामुष्मिकाय श्वोवसीयायार्ताभ्युपपत्तिवित्तयोर्भगवत्पादयो मूलम् शरणमभिप्रपन्नः।

तस्यास्तु जनन्युदञ्जलिः पलितशारशिखण्डबन्धस्पृष्टमुक्तभूमिरभाषत- "भगवन् ! अस्या मे दोषमेषा वो दासी विज्ञापयति। दोषश्च मम स्वाधिकारानुष्ठापनम्। एषहि गणिकामातुरधिकारो यद्दुहितुर्जन्मनः प्रभृत्येवाङ्गक्रिया, तेजोबलमेधासंवर्धनेन दोषाग्निधातुसाम्यकृता मितेनाहारेण शरीरपोषणम्— प्रसङ्गवत्यां संगीतादिक्रियायाः पूर्वसंगृहीतैर्ग्राह्यवाग्भिः सिद्धिलम्भनम्,—स्वतो रागान्धाय तद्भावदर्शनोन्मदिताय वा जातिरूपवयोऽर्थशक्तिशौचत्यागदाक्ष्यशीलमाधुर्योपन्नाय वा स्वतन्त्राय प्रदानम्।— गणिकायाश्च गम्यं प्रति सज्जतैव न प्रसङ्गः। सत्यामपि प्रीतौ न मातुर्मातृकाया वा शासनातिवृत्तिः।"[१] एतामि पंक्तिभिः दण्डी तात्कालिकसमाजे गणिकानां स्थितावेव विचारं न करोति, परं वेश्यानां भरणपोषणयोः शिक्षायामपि प्रकाशं स्थापयति यदेता स्वकीयपरिवेशे एव बाल्यमतियाप्य युव-

१ दशकुमारचरितम् (उत्तरपीठिका) द्वितीयोच्छ्वासः। (ऐम.आर.काले) पृ.६८

तयो च भूत्वा तत्रैव स्वव्यापारं प्रसारयन्ति। नैताः कथमपपि ततो निर्गन्तुं समर्थाः न च तत्रैव कस्मिन्नपि जनेऽनुरज्य विवाहसम्बधं कर्तुं समर्था आसन्। एताश्च स्वपरिवेशे नृत्यस्य, गीतस्य, वाद्यस्य, पाकशास्त्रस्य, पुष्प-कलायाः लिपिविज्ञानस्य शास्त्राणामन्येषां च शिक्षणमत एवालभन्त येनैताः स्वनैकट्यं प्राप्तानां जनानां मनोरञ्जनं साफल्येन कर्तुं समर्थाः स्युः।

वेश्यानामेतासां चरित्रं चित्रयितुं दण्डी ससाहसं पौराणिकानि तानि वृत्तान्यत्र प्रस्तौति यैः अर्थकामयोः धर्मस्य व्याघातो दूरीक्रियते। तथाहि—

पितामहस्य तिलोत्तमाभिलाषः, भवानीपतेर्मुनिपत्नीसहस्रसन्दूषणम्, पद्म-नाभस्य षोडशसहस्रान्तःपुरविहारः, प्रजापतेः स्वदुहितर्यपि प्रणयप्रवृत्तिः, शचीपतेरहल्याजारता, शशाङ्कस्य गुरु-तल्पगमनम्, अंशुमालिनो वड़वालङ्घ-नम्, अनिलस्य केसरिकलत्रसमागमः;बृहस्पतेरुतथ्यभार्याभिसरणम्, पराशरस्य दाशकन्यादूषणम्, पाराशर्यस्य भ्रातृदारसंगतिः, अत्रेर्मृगीसमागमः। (एवं च)

अमराणां च तेषु तेषु कार्येष्वासुरविप्रलम्भनानि ज्ञानबलान्न धर्मपीड़ा-मावहन्ति। धर्मपूते च मनसि नभसीव न जातु रजोऽनुषज्यते। तन्मन्ये नार्थकामौ धर्मस्य शततमीमपि कलां स्पृशतः।[१]

ततः काममञ्जरी अर्थकामयोः तत्सम्मुखे परिचयं दत्वा स्वविलासान् प्रति तमनुरक्तं कृत्वा स्वभवनमनैषीत्, कामोत्सवं चाकारयत्। तत्रैव च राजसमाजे साऽवदत्—

"देव ! जितानयाऽहम्। अस्यै दास्यमद्यप्रभृत्यभ्युपेतं मया। इति प्रभुं प्राणंसीत्—राज्ञा—वारमुख्याभिः पौरमुख्यैश्च गणशः प्रशस्यमाना स्वभवनमगत्वैव तमृषिमभाषत-'भगवन्! अयमञ्जलिः, चिरमनुगृहीतोऽयं दासजनः, स्वार्थ इदानीमनुष्ठेयः। स तु रागादशनिहत इवोद्भ्राम्याब्रवीत्—'प्रिये किमेतत् ? कुत इदमौदासीन्यम्।"[२]

---

१ दशकुमारचरितम्, चौखम्बा सं.सीरीज पृ.१४१,४२

२ दशकुमारचरितम्, चौखम्बा सं.सीरीज पृ.१४६

एवं कामञ्जरी मरीचिमेनमृषिमवञ्चयत्।

काममञ्जर्याऽनुजाया नाम रागमञ्जरी अस्ति। साऽपि नृत्यगीतवाद्या-दिभिः धनमेकत्रितमकरोत्-तथाहि—

"एष्वेव दिनेषु काममञ्जर्याः स्वसा यवीयसी रागमञ्जरी नाम पञ्चवीर-गोष्ठे संगीतकमनुष्ठास्यतीति सान्द्रादरः समागमन्नागरजनः ? स (अपहार-वर्मा) चाहं सह सख्या धनमित्रेण तत्र संन्यधिषि। प्रवृत्त-नृत्यायां च तस्यां द्वितीयं रङ्गपीठं ममाभून्मनः।[1]

अपहारवर्मा चैतस्या रागमञ्जर्यामनुरक्तः। तदा धनमित्रो रहसि तमक-थयत्-'सखे ! सैव धन्या गणिकादारिका, यामेवं भवन्मनोऽभिनिविशते'। यदा रागमञ्जर्यपि तस्मिन्नपहारवर्मण्यनुरक्ता गणिकास्वधर्म प्रतीपगामिना भद्रोदारेणाशयेन समगिरत-'गुणशुल्काहम्, न धनशुल्का। न च पाणिग्रह-णादृतेऽन्यभोग्यं यौवनम्'[2]।

एतस्मिन् वचने श्रुते रागमञ्जरीभगिनी काममञ्जरी, तन्माता माधवसेना-चातीव दुःखितेऽवर्तताम्। तेऽब्रूताम्—

"देव ! युष्मद्दासी रागमञ्जरी रूपानुरूपशीलशिल्पकौशला पूरयिष्यति मनोरथानित्यासीदस्माकमतिमहत्याशा साऽद्य मूलच्छिन्ना। यदियमति क्रम्य स्वकुलर्धममर्थनिरपेक्षा गुणेभ्य एवं स्वं यौवनं विचिक्रीषते[3]।

ततोऽपि काममंजरीमाधवसेनादयो रागमञ्जरीपरिवारसदस्या ऊचुः 'यदि कश्चिद्भु' जङ्गोऽस्मदिच्छया बिनैनां बालां विप्रलभ्य नाशयिष्यति स तस्करवद् वध्यः। एवं श्रुत्वाऽपहारवर्मा-प्रत्युदतीतरत्—

'किमत्र चिन्त्यम्। गुणैस्तामावर्ज्य गूढं धनैस्तत्स्वजनं तोषयावः।'[4]

---

१ दशकुमारचरितम्-चौ.सं.सी.पृ.१७१

२ दशकुमारचरितम्.चौ.सं.सी.पृ.१७४

३ तत्रैव,.चौ.सं.सी.पृ. १७४

४ तत्रैव पृ.१७५

ततश्चापहारवर्मा काममञ्जर्याः प्रधानदूतिकया धर्मरक्षितानाम्न्या पणबन्धमकरोत् 'अजिनरत्नमुदारकान्मुषित्वा मया तुभ्यं देयं, यदि प्रतिदानं रागमञ्जरी' इति[१]।

एवमनुरक्तां रागमञ्जरीमपहारवर्मा कथमपि समर्थो जातः पण्यान्मोचयितुम्।

एवं दण्डिनाऽतीव कौशलेन काममंजरी रागमंजर्योश्चित्रणं चित्रितम्। सूचितवान् च यत्तात्कालिके समाजे यदि गणिका स्वगण वेशबलेनैव जीवनं यापयितुमिच्छति तर्हि सामाजिकः कोऽपि तां ततो मोचयितुं न समर्थः। परं कथमपि गणिकापि साहसं करोति चेद्रागमञ्जरीव सा तत्परिवेशाद्बहिर्गार्हस्थ्यजीवनमपि प्रवेष्टुं समर्था स्यात्। एवं च काममंजरी रागमंजर्योः चरित्रं वैपरीत्यभावमाकलयन्नपि दण्डिनः सामाजिकस्थितिचित्रणकौशलस्यापूर्वं प्रमाणम्।

दशकुमारचरिते ब्राह्मणानां स्थितिः

यथाहि दशकुमारचरिते विविधपात्राणां वर्णनं पठित्वा तात्कालिकसमाजस्य स्वरूपं पाठकानामालोचकानां च समक्षमा गच्छति, तथैवाऽत्र ब्राह्मणानां स्थितेः, तेषामाचारविचारयोश्च वर्णनमपि कुशललेखन्या लिखितं दृश्यते। बौद्धानां जैनानां वा स्थितिरत्र नोत्तमा वर्णिता। काममंजर्याः दूतिरूपेशान्त रक्षितानाम्नी बौद्धभिक्षुणी धनिनां वञ्चनायाः कार्यं करोति।

परं ब्राह्मणानामपि स्थितिः वस्तुतोऽनर्थकर्येव। मरीचिनामा ऋषिः कथं स्वात्मानं काममंजर्या वञ्चयति। स तयाऽर्थकामयोः प्रशंसनं श्रुत्वा पौराणिकाख्यानेषु समागतानां देवानां लौकिकभिन्नर्षीणां च चरितदूषितकार्येषु समागतानां देवानां लौकिकभिन्नर्षीणां च चरितदूषितकार्येषु विश्वस्य धर्म

१ तत्रैव पृ.१७६

जहाति। काममंजर्यनुरक्तः चात्मन ऋषित्वमेव न नाशयति, परं दीनहीनतामापद्यते।

पूर्तपीठिकाया द्वितीय उच्छ्वासे राजवाहनेन सम्मिलितः मातङ्गो नाम द्विजो विन्ध्याचलकान्तारे वसतां विप्राणामधोगतिमेवं वर्णयति—

राजनन्दन ! केचिदस्यामटव्यां वेदादिविद्याभ्यासमपहाय निजकुलाचारं दूरीकृत्य सत्यशौचादिधर्मव्रातं परिहृत्य किल्विषमन्विष्यन्तः पुलिन्दपुरोगमास्तदन्नमुपभुञ्जाना बहवो ब्राह्मणब्रुवा निवसन्ति। तेषु कस्यचित्पुत्रो निन्दापात्रचरित्रो मातङ्गो नामाहं सह किरातबलेन जनपदं प्रविश्य ग्रामेषु धनिनः स्त्रीबालसहितानानीयाटव्यां बन्धने निधाय तेषां सकलधनमपहरन्नुद्धृत्य वीतदयो व्यचरम्। कदाचिदेकस्मिन् कान्तारे मदीयसहचरगणेन जिघांस्यमानं भूसुरमेकमवलोक्य दयायत्तचित्तोऽब्रवम्। ननु पापा ! न हन्तव्यो ब्राह्मणः[१]।

एवं च मातङ्गोऽयं किरातकोपाक्रान्तो विप्रस्य रक्षाथामेव प्राणानसृजत्। काममत्र मातङ्गचरितं न तथा दूषितं परं चित्रितानामन्येषां विन्ध्याटवीवासिनां द्विजानां जीवनं चरितं च गर्ह्यम्।

ब्राह्मणानां चरितानां संमुखे जैनानां चरितं गर्ह्यतरमासीत्। अपहारवर्मा स्वचरितं वर्णयन् विरूपकनामकस्य जैनसाधोर्विषये कथयति— एष चम्पायाः श्रेष्ठिनः पुत्र आसीत्। परं कारणवशात्तेन जैनधर्मोऽनुयातः। एतस्य जैनधर्मधारणस्य विषये स वर्णयति। चम्पायाः श्रष्ठिनो निधिपालस्य द्वौ सुतावास्ताम्। एकः तयोः सुन्दराकृतिः गुणयुक्तश्च। द्वितीयश्चाहं वैरूप्याद् विरूपकनाम्ना प्रसिद्धः। तयोरेतयोर्वसुनी निमित्तीकृत्य वैरोपजीविभिर्वैरं साधयद्भिरेकदा समाज उद्घोषितम्—'न पुनर्वपुर्वसु वा पुंस्त्वमूलम्, अपि तु प्रकृष्टगणिका प्रार्थ्ययौवनो हि यः स पुमान्'।—

---

१ दशकुमारचरितम्—चौ.सं.सीरीज.पृ.४३

आसीनयोश्चावयोर्मामिवोपगम्य सा नीलोत्पलमयमिवापाङ्गदामाङ्गे मम मुञ्चन्ती त जनमपत्रपयाऽधोमुखं व्यधत्त।

सुभगंमन्येन च मया स्वधनस्य स्वगृहस्य स्वगणस्य स्वदेहस्य, स्वजीवितस्य च सैवेश्वरीकृता। कृतश्चाहमनया मलमल्लकशेषः। हृतसर्वस्वतया चापवाहितः प्रपद्य लोकोपहासलक्ष्यतामक्षमश्च सोढुं धिक्कृतानि पौरवृद्धानामिह जैनायतने मुनिनैकेनोपदिष्टमोक्षवर्त्मा सुकर एव वेषो वेशनिर्गतानामित्युदीर्णवैराग्यस्तदपि कौपीनमजहाम[१]।

एतेन जैनधर्मानुयायिनां चरितं नात्र कथमपि प्रशंसितम् यो हि जनः स्वयमात्मानं निन्दति, स परैस्तु निन्द्य एव भविष्यति।

दण्डिनः पात्राणां चित्रणमीदृशं यथार्थपरकं विद्यते यत्पाठका अस्याध्ययने तथा रमन्ते यत्पूर्णं ग्रन्थं परिसमाप्यैव विरमन्ति।

---

१ दशकुमारचरितम् चौ.सं.सीरीज पृ.१५०-१५१

XIV

दण्डिनो वर्णनकौशलम्

गद्यकारो दण्डी दशकुमारचरिते बहूनामेतादृशां परिवेशानां तथा चित्रणं व्यधाद् यत्कामं ते परिवेशाः कीदृशा अपि लोकाचारविवर्जिता मन्यन्ते, परं तेषां वर्णनं पठित्वा तु पाठकाः तान् दुर्गुणानपि सगुणानेव स्वीकरोति।

विहारमद्रोऽनन्तवर्मणः सम्मुखे राजनीतिसम्मतान् गुणानेवमपवदति—

स 'तथा' इत्यधीते। श्रृणोति च। तत्रैव जरां गच्छति। तत्तु किल शास्त्रं शास्त्रान्तरानुबन्धि। सर्वमेव वाङ्मयमविदित्वा न तत्त्वतोऽधिगंस्यते। भवतु। कालेन बहुनाऽल्पेन वा तदर्थाधिगतिः। अधिगतशास्त्रेण चादौ पुत्र-दारमपि न विश्वास्यम्—।[१]

ततश्च राज्ञो दिनचर्याया वर्णने विहारभद्रोदिनाष्ट भागचर्यावर्णनेषु राजनीतेः दोषानेव श्रावयित्वा तं राजनीतेर्विमुखं करोति। वशित्वे चेन्द्रियाणां ब्रूते—'येऽप्युपदिशन्ति एवमिन्द्रियाणि जेतव्यानि, एवमरिषड्वर्ग-स्त्याज्यः, सामादिरूपायवर्गः स्वेषु परेषु चाजस्रं प्रयोज्यः, सन्धिविग्रहचिन्त-यैव नेयः कालः, स्वल्पोऽपि सुखस्यावकाशो न देयः इति तैरप्येभिर्मन्त्रिबकैर्युष्मत्तश्चौर्यार्जितं धनं दासीगृहेष्वेव भुज्यते। के चैते वराकाः। येऽपि मन्त्रकर्कशास्तन्त्र-कर्तारः शुक्राङ्गिरसविशालाक्षबाहुदन्तिपुत्रप-राशरप्रभृतयस्तैः किमरिषड्वर्गो जितः, कृतं वा तैः शास्त्रानुष्ठानम्। तैरपि हि प्रारब्धेषु कार्येषु दृष्टे सिद्ध्यसिद्धी।'[२]

---

१ दशकुमारचरितम्,चौ.सं.सीरीज-पृ.४२

२ दशकुमारचरितम् चौ.सं.सीरीज. पृ.४२४-२५

दण्डी यथा काममञ्जरी वक्तव्ये पौराणिकाना-माख्यानानां तत्र वर्णितानां च रुद्रब्रह्मेन्द्रादीनां चरितदोषान् ख्याति, तथैवाऽत्र राजनीतिग्रन्थकर्तृणामाचार्याणां शुक्रपराशरप्रभृतीनां नीतिदोषान् वर्णयति।

पूर्वालोचनेन यदि स नास्तिकतां दर्शयति तर्हि राजनीतिज्ञानां पुराचार्याणां वर्णनेनेत्थं तत्तद्ग्रन्थाध्येतृत्वं स्वस्य दर्शयति।

अनन्तरं च वसुरक्षितोऽनन्तवर्मणो मन्त्री चिन्तयति—'अविनीतोऽपि न परित्याज्यः पितृपैतामहैरस्मादृशैरयमधिपतिः।—भवतु भविता तावदनर्थः।'[१]

इत्थमेवाऽश्मकेन्द्रामात्यस्य इन्द्रपालितस्य सूनोः चन्द्रपालितस्य माध्यमेन दण्डी व्यसनानि गुणरूपेणैवमुपवर्णयति यद्व्यसनान्यपि गुणा एव प्रतीयन्त, औत्कर्ष्यात्। तद्यथा—

मृगयावर्णनम्—

"देव ! यथा मृगया ह्यौपकारिकी न तथाऽन्यत्। अत्र हि व्यायामोत्कर्षादापत्सूपकर्ता दीर्घाध्वलङ्घनक्षमो जङ्घाजवः, कफापचयादारोग्यैकमूलमाशयाग्निदीप्तिः, मेदोऽपकर्षादङ्गानां स्थैर्यकार्कश्यातिलाघवादीनि, शीतोष्णवातवर्षक्षुत्पिपासा-सहत्वम्—शैलाटवीप्रदेशानां विविधकर्मक्षमाणामालोचनम्, आटविकवर्गविश्रम्भणम्, उत्साहशक्ति-संधुक्षणेन प्रत्यनीकवित्रासनमिति बहुतमा गुणाः।"[२]

द्यूतवर्णनम्—

"द्यूतेऽपि द्रव्यराशेस्तृणवत्त्यागादनुपमानमाशयौदार्यम्, जयपराजयानवस्थानाद्धर्षविषादयोरविधेयम्,—अध्यवसाय-सहचरेषु साहसेष्वरतिः। अतिकर्कशपुरुषप्रतिसंसर्गादनन्यधर्षणीयता, मानावधारणमकृपणं च शरीरवापनम्।"[३]

---

१ दशकुमारचरितम् चौ.सं.सी.पृ.४२९
२ दशकुमारचरितम् चौ.सं.सी.पृ.४३०
३ दशकुमारचरितम्—चौ.सं.सी.पृ.४३१

न केवलमेतदेवापितु यानि व्यसनानि सर्वथाहानिकराणि, शरीरनाशकानि, राजयक्ष्मादिरोगकारकाणि च तेषामपि गुणत्वमेवमुद्घष्यते—यथा

उत्तमाङ्गनोपभोगवर्णनम्—

उत्तमाङ्गनोपमोगेऽप्यर्थधर्मयोः सफलीकरणम्, पुष्कलः पुरुषाभिमानो, भावज्ञानकौशलम्, अलोभक्लिष्टमाचेष्टितम्, अखिलासु कलासु वैचक्षण्यम्,—बुद्धिवाचोः पाटवम्, उत्कृष्टशरीरसंस्कारात्सुभगवेषतया लोकसम्भावनीयतया परं सुहृत्प्रियत्वम्, गरीयसी परिजनव्यपेक्षा, स्मितपूर्वाभिभाषित्वम्, उद्रिक्तसत्वता, दाक्षिण्यानुवर्तनम्। अपत्योत्पादनेनोभयलोकश्रेयस्करत्वमिति।[१]

पानव्यसनस्य गुणत्वं यथा—

"पानेऽपि नानाविधरोगभङ्गपटीयसामासवानामासेवनात्स्पृहणीयवयोव्यवस्थापनम्, अहंकारप्रकर्षादशेषदुःखतिरस्करणम्,—मत्सराननुबन्धादानन्दैकतानता, शब्दादीनामिन्द्रियार्थानां सातत्येनानुभवः संविभागशीलतया सुहृद्वर्गसंवर्गणम्, अनुपमानमङ्गलावण्यम्, अनुत्तराणि विलसितानि, भयार्तिहरणाच्च साङ्ग्रामिकत्वमिति।"[२]

एतद्व्यसनेतरेषामपि व्यसनानां गुणत्वं संक्षेपेण वर्णयतीत्थम्—

"वाक्पारूष्यं दण्डो दारुणो दूषणानि चार्थानामेव यथावकाशमौपकारिकाणि। नहि मुनिरिव नरपतिरुपशमरतिरभिभवितुमरिकुलमलम्। अवलम्बितुं च लोकतन्त्र[३]म्।"

एतच्च व्यसनानां गुणत्वं, वस्तुतो न गुणत्वम्। यथा हि मनुः मनुस्मृतौ पूर्वंतु श्राद्धे पितृणां परितोषणार्थं ब्राह्मणेभ्यः परेषामीदृशानां मांसा-

---

१ दशकुमारचरितम् चौ.सं.सी.पृ.४३२
२ दशकुमारचरितम् चौ.सं.सी.४३२-३३
३ दशकुमारचरितम् चौ.सं.सी.पृ.४३३

दीनां परिवेषणं सूचयति, वस्तुतो यदग्राह्यं, ततश्च मधुमिश्रपपदार्थपरिवेषणमक्षयं सूचयति।[१] तथैवैतेषां गुणरूपवर्णितानां व्यसनानामासेवनादनन्तवर्मणो मृत्युरेवाऽत्र निर्दिष्टा।

एवं दण्डिनो लौकिकाचारव्यवहराणामेतद्विचित्रवर्णनं तस्य गद्यरचनायाः कथाप्रवाहं सततं प्रवाहयितुं सर्वथा विशेषत्वाधायकमेव।

दण्डिनः कथानामुद्देश्यम्

दण्डिनः पूर्वपीठिका-उत्तरपीठिका (दशकुमारचरितम्) उपसंहारात्मकोऽयं प्रेमप्रसङ्गात्मकं गद्यकाव्यं कामं वैदुष्यपूर्णं तथापि रचनेयं प्रायशो मनोरञ्जनार्थं कृता। तत्रापि च नायकेन शास्त्रवचनोद्धरणपूर्वकं (यथा गणिकारूपाणां चित्रणे प्रतिपादितम्) परस्त्री हरणं, स्तेयमाध्यनेन विरूपकसदृशस्य पात्रस्य निर्धनतायाः परिहारः, न चापि कर्तव्यकर्मरूपेण यतो हि स्तेयादीनां किं वा गुणरूपधारिणां व्यसनानामपि परिणामोऽनर्थकर एव साधितः।

मरीचिविरूपकादि पात्राणां चित्रणेन, मातङ्गनाम्नो वा ब्राह्मणस्य वर्णनेन, ब्राह्मणजैनबौद्धानामनेकत्रोपहासः कृतः। एतादृशेषु प्रसङ्गेष्वेव भवानीपति-विष्णु-ब्रह्मेन्द्राणां दोषाः प्रदर्शिताः, पराशरशुक्रादीनां नीतिज्ञानां

---

१ १. दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः।
शशकूर्मयोस्तु मांसेन मासानेकदशैवतु॥ (उत्सर्गः। मनुस्मृतिः २,२७०, २.
संवत्सरं तु गव्येन पयसा पायसेन च।
वाध्रर्णिस्य मांसेन तृप्तिर्द्वादशवार्षिकी॥ (फलदायकः) मनुस्मृतिः, २७१, ३.
कालशाकं महाशाकाः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्वशः॥ (उत्सर्गः) मनुस्मृतिः २-२७२, ४.
यत्किंचिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्।
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च॥ (फलदायकः) मनुस्मृतिः २-२७३, ५.
अपि नः स कुले जायाद्यो नो दद्यात्त्रयोदशीम्।
पाथसं मधुसर्पिभ्यां प्राक्छाये कुञ्जरस्य च॥ मनुस्मृति २-२७४

चरितेष्ववपादो दर्शितः। उपर्युक्तानि सर्वाण्येतानि वर्णनानि मुख्यतः कथासु मनोरंजनं प्रदर्शितुमेव कृतानि।

दशकुमारचरितस्य कथासु पुरुषेभ्यः स्त्रीभ्यः च कृते मनोरञ्जनसाधनान्यपि भिन्नानि। प्रमतिर्यदा स्वचरितं वर्णयति तदा कुक्कुट क्रीडया पाठकानां मनोरञ्जनसाध्यं साधयति—

'मार्गे च महति निगमे नैगमानां ताम्रचूड़युद्धकोलाहलो महानासीत्। अहं च तत्र सन्निहितः किंचिदस्मेषि। सन्निधिनिषण्णस्तु मे वृद्धविटः कोऽपि ब्राह्मणः शनकैः स्थितिहेतुमपृच्छत्। अब्रवंच। कथमिव नारिकेलजातेः प्राच्यवाटकुक्कुटस्य प्रत्यीच्यवाटः पुरूषैरसमीक्ष्य बलाकाजातिस्ताम्रचूडो बलप्रमाणधिकस्यैव प्रतिविसृष्टः इति। सोऽपि तज्ज्ञः किमज्ञैरेभिर्व्युत्पादितैः। तूष्णीमास्व। इत्युपहस्तिकायास्ताम्बूलं कर्पूर-सहितमुद्धृत्य मह्यं दत्त्वा चित्राः कथाः कथयन्क्षणमतिष्ठत्। प्रायुध्यत चातिसंरब्धमनुप्रहारप्रवृत्तस्वपक्षमुक्तकण्ठीरवरवं विहङ्गमद्वयम् जितश्चासौ प्रतीच्यवाटकुक्कुटः'[१]।

एतेन च ज्ञायते दण्डी सर्वाभिरेताभिः पक्षिक्रीडाभिः कुक्कुटयुद्धैर्वा न केवलं परिचितः परमिदमपि ज्ञातवान् यन्नारिकेलजातिः, बलाकाजातिः च कुक्कुटः परस्परं दृढमयुध्येताम्।

स्त्रीणां कृते मनोरञ्जनसाधनानीतराण्यासन्। तासां मनोरञ्जनसाधनं कलाकौशलमासीत्। कन्दुकक्रीड़ास्वेतासां विशिष्टा रुचिरासीत्। मित्रगुप्तः यदा स्वदिग्विजयरूपं वर्णनं करोति, तदा सुह्मदेशस्य राज्ञः, तुंगधन्वनः पुत्र्याः राजकुमार्या कन्दुकावत्याः कन्दुकक्रीड़ाया वर्णनमित्थं विदधाति—

'एवमनेककरणमधुरं विहरन्ती रङ्गगतस्य रक्तचेतसो जनस्य प्रतिक्षणमुच्चावचाः प्रशंसावाचः प्रतिगृह्णती, प्रतिक्षणारूढविभ्रमं कोशदासमंसेऽवलम्ब्य कण्टकितगण्डमुत्फुल्लेक्षणं च मय्याभिमुखीभूय तिष्ठति,

---

१ दशकुमारचरितम्. चौ.सं.सी.पृ.३०४,३०५

तत्रथमावतीर्णकन्दर्पकारितकटाक्षदृष्टिः; तदनुमार्गविलसित-लीलाञ्चितभ्रलता श्वासानिलवेगान्दोलितैर्दन्तच्छदरश्मिजालैर्लीलापल्लवैरिव मुखकमलपरिमल-ग्रहणलोलानलिनस्ताडयन्तो।

मण्डलभ्रमणेषु कन्दुकस्यातिशीघ्रप्रचारतया विशन्तीव मद्दर्शनलज्जया पुष्पमयं पञ्जरम्, पञ्चबिन्दुप्रसृतेषु पञ्चापि पञ्चबाणबाणान्युगपदिवाभिपतत-स्त्रासेनावघट्टयन्ती, गोमूत्रिकाप्रचारेषु धनदर्शितरागविभ्रमा विद्युल्लतामिव विडम्बयन्ती—आकुञ्चितप्रसृतवेल्लितभुजलताभिहतललितकन्दुकम्, आ-वर्जितनाहुपाशम्, उपरिपरिवर्तितत्रिकविलग्नलोलकुन्तलम्, अवपतनोत्पतन-निर्व्यवस्थमुक्ताहारम्—आगलितस्तनतटांशुकनियमनव्यापृतैकपाणिपल्लवं च निषद्योत्थाय निमील्योन्मील्य स्थित्वा गत्वा चैवातिविचित्रं पर्यक्रीडत राजेकन्या।

अभिहत्य भूतलाकाशयोरपि क्रीड़ान्तराणि दर्शनीयान्येकेनैव वाऽनेके-नैव वा कन्दुकेनादर्शयत्।[१]

एतेनैतन्निश्चितं यद्राजप्रासादेषु स्त्रियः स्वास्थ्यस्य रक्षायै, सौन्दर्यवर्ध-नाय च व्यायाम रूपे कन्दुकक्रीड़ामकुर्वत। ताश्च निपुणतमा आसन्नेतासु। कन्दुकक्रीड़ा चैतावती प्रचलिता यदेतन्नृत्यस्य क्रीड़ाया वा नामकरणमेतस्यै-वाधारेणाभवत्।

एवमेव प्रमतेः साहसिकवर्णनप्रसङ्गे द्यूतस्यापि वर्णनं क्रीड़ारूपेण भ-वति। तस्मिन्काले द्यूतमेका कलाऽज्ञयत। अत्र जनः पञ्चविंशतिकला अशिक्षत। तस्मिन् काले पाशैः कपर्दिकाभिर्वा द्यूतमक्रीड्यत। एवंच हस्त-कलानैपुण्यमस्यां कलायामनिवार्यमासीत्।

---

१ दशकुमारचरितम्, चौ.सं.सीरीज.पृ.३२९,३३०

XV

दण्डिकालीना राजशासनव्यवस्था

दण्डिनो दशकुमारचरितस्याध्ययनेन ज्ञायते यदयं राजशासन-व्यवस्थायां कौटिल्यस्य व्यवस्थानुकुरुते। कौटिल्यो राजनि यान् गुणाननिवार्यत्वेन स्वीकरोति तानेव दण्डी पुण्यवर्यणि नाम राज्ञि पूर्णत्वेन प्रतिपादयति—

विदर्भो नाम जनपदः, तस्मिन् भोजवंशभूषणम्, अंशावतार इव धर्मस्य, अतिसत्त्वः, सत्यवादी, वदान्यः, विनीतः, विनेता प्रजानाम्, रञ्जितभृत्यः, कीर्तिमान्, उदग्रः, बुद्धिमूर्तिभ्यामुदग्रशीलः, शास्त्र-प्रमाणकः, शक्यभव्यकल्पारम्भी, संभावयिता बुधान्, प्रभावयिता सेवकान्, उद्भावयिता बन्धून्, न्यग्भावयिता शत्रून्, असम्बद्धप्रलापेष्वदत्तकर्णः, कदाचिदप्यवितृष्णो गुणेषु, अतिनदीष्णः कलासु, नेदिष्ठो धर्मार्थसंहितासु—सद्यः प्रतिकर्ता दैवमानुषीणामापदां षाड्गुण्योपयोगनिपुणः, मनुमार्गेण प्रणेता चातुर्वर्ण्यस्य पुण्यश्लोकः पुण्यवर्मा नामासीत्[१]।

ईदृशी प्रबलतमा सम्भावनाऽऽस्ते यद् दण्डिनः काले कोऽपीदृशः सत्ययुगगुणसदृशगुणैर्युक्तः कोऽपि कस्यापि प्रदेशस्य शासकोऽवित्त, यमाधारीकृत्य दण्डी राज्ञो गुणान् वर्णयति।

अस्यैव नीतिज्ञराजस्य पुण्यवर्मणः पुत्रोऽनन्तवर्माऽऽसीत्। सोऽपि पितृगुणसदृशः, सर्वराजगुणसम्पन्नः, नृत्यसंगीतवाद्यादिषु काव्यरचनासु च निपुणः आसीत्। परं न स आसीन्नीतिशास्त्राभिज्ञाता। अतो वसुरक्षितनामा तत्रप्रधानामात्यस्तं नीतिशिक्षां वक्तुमेवमुपचक्रमे—

---

१ दशकुमारचरितम् चौ.सं.सी.पृ.४१२

'तात—बुद्धिश्च निसर्गपट्वी—तवेतरेभ्यः प्रतिविशिष्यते। तथाप्यसा-वप्रतिपद्यात्मसंस्कारमर्थशास्त्रेषु, अनग्निसंशोधितेवहेमजातिर्नातिभाति बुद्धिः। बुद्धिहीनो हि भूभृदत्युच्छ्रितोऽपि परैरध्यारुह्यमाणमात्मानं न चेतयते।—आगमदीपदृष्टेन खल्वध्वना सुखेन वर्तते लोकयात्रा। दिव्यं हि चक्षुर्भूतभ-वद्भविष्यत्सु व्यवहितविपृकृष्टादिषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति। तेन हीनः सतोरप्यायतविशालयोर्लोचनयोरन्ध एव जन्तुरर्थदर्शनेष्वसाम-र्थ्यात्'[१]।

एतत्सर्वं विचार्य समालोच्यते यत्कौटिल्यशास्त्रमेव रजनीतेराधारीभूतो ग्रन्थो यमवलम्ब्यैव दण्डिनोऽनुसारेणापि नीतिशिक्षा ग्रहीतुं शक्यते। एत-स्मिन्नेव प्रसङ्गे पुनर्दण्डी कौटिल्यसम्मतानां त्रयीवार्तान्वीक्षिकीदण्डनीतीनां चतसृणां विद्यानां वर्णनयभिदधति—

'ननु चतस्रो राजविद्याः त्रयी, वार्ता, आन्वीक्षिकी, दण्डनीतिरिति। तासु तिस्रस्त्रयीवार्तान्वीक्षिक्यो महत्यो मन्दफलाश्च, तास्तावदासताम्। अधीष्व तावद्दण्डनीतिम्। इयामिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षडिभः श्लोकसहस्रैः संक्षिप्ता। सैवेययधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमा।'[२]

एवं च नीतेः शिक्षां प्रदर्श्य दण्डी राज्ञो दिनचर्यां विभजन् दिनस्य रात्रे श्चाष्टौ भागान् निर्दिशति। कामंतेऽष्टौ भागा अद्यत्वे न संभवाः, परं तेषु तेषु भागेषु राज्ञः कृते यद्यत्करणीयं तत्तदद्यत्वे प्रशस्तराजस्य कृते परममनिवार्पम्।

अतो दण्डिनो दशकुमारचरितं यथा मनोरञ्जनप्रधानं तथैव शिक्षाप्रद-मपि प्रत्येकं पाठकानां कृते। यथा चात्रराजनीतेः शिक्षा वैशद्येन प्रदत्ता, तथैव प्रत्येकं राजकुमारस्य दिग्विजय-वर्णनस्य वा साहसिककृत्यस्य वा परिसमाप्तौ शिक्षा सर्वत्रैव परिदृश्यते। शिक्षायाः प्रकारोऽपि द्विमुखः। केचिदत्र दृश्यन्ते जना आचारविचारविहीनाः केचिच्च सर्वश्रेष्ठगुणसम्पन्नाः।

---

१ दशकुमारचरितम् चौ.सं.सी.पृ.४१५-४१६

२ दशकुमारचरितम्.चौ.सं.सीरीज.पृ.४१८

अत एव च स्वार्थकातरत्वदुर्व्यसनकामुकाः कथानायकाः, बलवद्बुद्धिमत्परोपकारिसच्चरित्रकलानुरागिणो नायका राजानो वा सन्ति, ये दासानां सेवकानां वा सदैवादरं विदधते।

कथायाः प्रारम्भे एव यदा राजहंसस्य पुत्रेण राजवाह्न सह सर्वे मन्त्रिपुत्राः समवेताः तदा विविधं ज्ञानमलभन्त, विद्यानिपुणाः च संजाताः। तथाहि—

एवं मिलितेन कुमारमण्डलेन सह बालकेलीरनुभवन्नधिरूढानेकवाहनो राजवाहनोऽनुक्रमेण चौलोपनयनादिसंस्कारजातमलभत। ततः सकललिपिज्ञानं निखिलदेशीयभाषापाण्डित्यं, षडङ्गसहितवेदसमुदायकोविदत्वं, काव्यनाटकाख्यानाख्यायिकेतिहासचित्रकथासहितपुराणनैपुण्यं धर्मशब्दज्योतिस्तर्कमीमांसादिसमस्तशास्त्रनिकरचातुर्यं कौटिल्यकामन्दकीयादिनीतिपटलकौशलं वीणाद्यशेषवाद्यदाक्ष्यं संगीतसाहित्यहारित्वं मणिमन्त्रौषधादिमायाप्रपञ्चचुञ्चुत्वं मातङ्गतुरङ्गादिवाहनारोहणपाटवं विविधायुधप्रयोगचणत्वं चौर्यदुरोदरादिकपटकलाप्रौढत्वं च तत्तदाचार्येभ्यः शिक्षित्वा सः 'अहं शत्रुजनदुर्लभः परमानन्दममन्दमविन्दत'।[१]

एवं दण्डिनः काले राजकुमाराणां शिक्षणायानेके विद्याकेन्द्राः स्थापिताःस्युः। या या विद्याश्चात्र राजकुमारैः शिक्षिता यद्येता न शिक्षिताः स्युः तर्हि ते स्वस्वचरितेषु श्रेष्ठविद्याछलकपटादिराहित्ये कथं तांस्तान् शत्रून् कपटिनो वा जनान् विजयेरन्।

दण्डी हि प्रारम्भे एव शिक्षाणां विविधप्रकारान् दर्शित्वा स्वोद्देश्यमपि प्रथमेमवोद्घोषितवान् यदेताः कथा अधीत्य सर्वे पाठका विविध- विद्यानिपुणा भविष्यन्ति। दण्डी च राजवाहनपरिचयं बालचन्द्रिकाया मुखेनैवं कारयति—

'ततो बालचन्द्रिका तयोरन्तरङ्गवृत्तिं भावविवेकज्ञैर्ज्ञात्वा कान्तासमाजसन्निधौ राजनन्दनोदन्तस्य सम्यगाख्यानमनुचितमिति लोकसाधारणैर्वाक्यैरभा-

---

१ दशकुमारचरितम् चौ.सं.सी.पृ.३९

षत—' भर्तृदारिके ! अयं सकलकला-प्रवणो देवतासान्निध्यकरण आहव-निपुणो भूसुरकुमारो मणिमन्त्रौषधिज्ञः परिचर्यार्हो भवत्या पूज्यताम्।

एतावता राजकुमाराणां परिचयेन सम्यगिदं परिणिष्ठाप्यते यद्राजकुमारा विविधशिक्षाभिज्ञा आसन्। येषां च राजकुमाराणां विषये लेखकः स्वयं लिखति निस्सन्देहं सोऽपि विविधकलाकौशलज्ञोऽभिज्ञ एव आसीत्।

XVI

दण्डिनो गद्यशैली

दण्डिनः गद्यस्याधाररूपेण पूर्वमेव निर्दिष्टं. यद् दशकुमारचरित-कथा बृहत्कथामनुवर्तते। अद्यत्वे प्राप्यमाणे संस्करणे कथानां विवरणस्य यद्रूपं निर्दिष्टं तदेव दशकुमारचरितस्यापि दृश्यते। पूर्वपीठिकायां सुरतमंजर्याः कथनेनापि बृहत्कथायाः सङ्केतो लभ्यते। गुणाढ्यदण्डिनोः पात्रेषु साहित्यिक-श्रृङ्गारिक वर्णनेषु चाप्यस्ति महत्साम्यम्। अनेन ज्ञायते यद्दण्डिनः पूर्वं केवलं बृहत्कथाया एवास्तित्वमासीदतो बृहत्कथैव दण्डिन आदर्शः। बृहत्कथायां यथा मनोरंजनस्य प्राधान्यं तथैव दशकुमारचरितेऽपि मनोरंजनस्यैव प्राधान्यं वर्तते।

दण्डिनो गद्यशैली सरला समासरहिताऽलङ्कृता लोकोक्तिप्रधाना च। अत्र बहुत्र व्याकरणदोषा दरीदृश्यन्तेऽशुद्धाः प्रयोगास्तथाऽयथार्थतापि लभ्यते। लिट् लकारस्यानुचितः प्रयोगो यथा—

'अवार्यदुर्बयश्चाहमुपसृत्य दिङ्मुखेषु भ्रमन्यदृच्छयाऽस्यां वाराणस्यां प्रमदवने मदनदमनाराधनाय निर्गत्य सह सखीभिः कन्दुकेनानुक्रीडमानां काशीभर्तुश्चण्डसिंहस्य कन्यां कान्तिमतीं नाम चकमे।'[१]

अत्र हि दण्डिना लिटः प्रयोग उत्तमपुरुषेण सह कृतः। एषो ह्यशुद्धः प्रयोगः। लिटः परोक्षे रूप एव प्रयुज्यमानत्वात्।

अपरत्रापि—

'यद्येवमेतन्मातुर्मत्पितुश्चैको मातामहः इति सस्नेहं तमहं सस्वजे'[२] इत्यत्रापि उत्तमपुरूषेण सह लिट्प्रोगोऽशुद्धः।

---

१ ऐम.आर.काले-दशकुमारचरितम् पृ.१२६

२ ऐम.आर.काले-दशकुमारचरितम् पृ.२०२

एवं यत्र कुत्र वाक्यरचनाऽपि न संशुद्धा। यथा—

'अथ भगवन्तं मरीचिं वेशकृच्छ्रादुत्थाय पुनः प्रतिपन्नतपः प्रभाव-प्रत्यापन्नदिव्यचक्षुषमुपगम्य तेनास्म्येवंभूतं त्वद्दर्शनमभिगतः।'[१]

इत्यत्र हि 'अथ वेशकृच्छ्रादुत्थाय मरीचिं पुनः' इत्यादिकं स्यात्।

एवं च सन्ति केचिदप्रचलिताः प्रयोगाः—यथा 'उज्जयिनीं परिवव्राज।' अत्र हि परिपूर्वको व्रज्धातोः प्रयोगः संन्यसनार्थे प्रयुज्यमानो भ्रमणार्थे प्रयुक्तः।

परं प्रायश एते व्याकरणदोषा अधिकतरं तु पूर्वपीठिकायां प्रयुक्ताः। पूर्वपीठिका दण्डिन इतरेण केनापि लिखिता।

दण्डी तु प्रायशः पञ्चतन्त्रस्य हितोपदेशस्यैव सरलां शैलीमनुवर्तते। पञ्चतन्त्रहितोपदेशयोश्च सन्ति बहून्याव्याकरणोदाहरणनि। अवन्तिसुन्दरी कथायाश्चापि समालोचनेन तस्य सारल्यत्वमेवाभासते। दशकुमारचारितस्य सप्तम उच्छ्वासो दण्डिशैल्या विशिष्टमुदाहरणम्। अत्र हि सम्पूर्ण उच्छ्वासे ओष्ठ्यवर्णाभावः। ओष्ठ्यवर्णानामभावेऽपि नास्ति कुत्रापि कथायामरोचकता। यथा हि—

'तदाकर्ण्य क एष सिद्धः, का च सिद्धिः, किं चानेन किङ्करेण करिष्यते। इति दिदृक्षाक्रान्तहृदयः किंकरगतया दिशा किञ्चिदन्तरं गतस्तालतरनरास्थिशकलरचितालंकाराक्रान्तकायम्' इत्यादि।

एषा चानुकरणीयतैतस्य प्रयितामहस्य भारवेः। भारविर्हि किरातार्जुनीयस्य पञ्चदशे सर्गे कतिपयान् श्लोकान् केवलं नकारेण वर्णेन लिखितवान्। एषा च शैली बाणेऽपि न विद्यते।

---

१ ऐम.आर.काले-दशकुमारचरितम् पृ.१०१

सप्तमोच्छवासस्य प्रारम्भादन्तपर्यन्तं यावत् पाठका अन्वेषयन्तोऽपि कुत्राप्यौष्ठवर्णान् न लभन्ते। संस्कृतसाहित्ये वस्तुतो दण्डिनः इदं कलाकौशलं सर्वथा श्लाघ्यम्।)

✓दण्डिनो रचनायां प्रसादगुणस्य समावेशः। स स्वयं प्रसादगुणमेवं परिभाषते—

प्रसादवत्प्रसिद्धार्थमिन्दोरिन्दीवरद्युति।
लक्ष्मलक्ष्मीं तनोतीति प्रतीतिसुभगं वचः॥[१]

अत एव स्वभावतो न दृश्यतेऽत्र क्लिष्टवर्णकल्पना। दण्डिनः शब्दानां चयने रोचकता। स च प्रायशो यत्र तत्र ईदृशी उक्तीः प्रयुङ्क्ते या ययार्थाः—यथा—

'स्वदेशो देशान्तरमिति नेयं गणना विदग्धस्य पुरुषस्य।'[२]

'नह्यलमतिनिपुणोऽपि पुरुषो नियतिलिखितां लेखामतिक्रमितुम्'।[३]

'इह जगति हि न निरीहं देहिनं श्रियः संश्रयन्ते'

'जीवितं हि नाम जन्मवतां चतुः पञ्चापप्यहानि'[४]

दण्डी दशकुमारचरिते बहुत्रानुप्रासं प्रयुंक्ते। अनुप्रासेन च ईदृशं सौन्दर्यमापादयति, यत्संस्कृतसाहित्येऽन्यत्र दुर्लभमस्ति। अनेनैव कारणेन दण्डिनः पदलालित्यमित्युक्तिः सर्वत्रोद्घोष्यते। एतादृशनि सन्तीमान्युदाहरणानि।

'आरब्धकामिजनवृत्तं निवृत्तस्ववृत्ताभिलाषम्'[५]।

---

१ काव्यादर्शः-१-४५
२ ऐम.आर.काले-दशकुमारचरितम् पृ. ८०
३ ऐम.आर.काले-दशकुमारचरितम् पृ.८९
४ ऐम.आर.काले, दशकुमारचरितम् पृ.१९४
५ तत्रैव, पृ.७१

'अयुग्मशरः शरशयने शाययिष्यति'[१]

'असत्येनास्य नास्यं संसृज्यते'[२]

'अनेकस्यानेक आतङ्कश्चिरं चिकित्सकैरसंहार्यः संहृतः'[३] ।

'स पुण्यैः कर्मभिः प्राण्य पुरुषायुषं पुनरपुण्येन प्रजानामगण्यतामरेषु'[४] ।

एवं वयं पश्यामो यद् दण्डिनः शैली स्वकीया शैल्येव। नात्र सुबन्धोरिव प्रत्यक्षरश्लेषमयं गद्यं, न च बाणस्य रुचिरस्वर वर्णमयानि पदानि। एषोऽस्ति वैदर्भीकविः। अत एव च विदर्भप्रान्तस्य राज्ञः पुण्यवर्मणः चरित्रमुदारं, नीतिकौशलपूर्णम्, प्रजानुरञ्जनपूर्णं च चित्रयति।

('विदर्भो नाम जनपदः, तस्मिन् भोजवंशभूषणम्, अंशावतार इव धर्मस्य, अतिसत्त्वः, सत्यवादी—षाड्गुण्योपयोगनिपुणः, मनुमार्गेण प्रणेता चातुर्वर्ण्यस्य पुण्यश्लोकः पुण्यवर्मा नामासीत्।'[५]

दण्डिनः शैली सरसा, सुबोधा, प्रवाहमयी च। नैष कठोरंध्वनिभिरतिशयोक्तिभिः शब्दाडम्बरैश्च भाषां गुरुतापूर्णां कठिनां वा करोति। कामं सर्वत्र तु वाक्यानि लघूनि न परं प्रायशो वाक्यानि लघून्येव। सर्वत्र शब्देषु ओजस्विता, लालित्यं सुव्यक्ताऽभिव्यक्तिश्च। अतः शैल्यामत्र स्पष्टताऽर्थस्य रसस्य सरसाऽभिव्यक्तिः शब्दविन्याससौन्दर्यं, कल्पनायाश्च और्वरकत्वं विद्यते। सूर्योदयस्य वर्णनं कुर्वन् दण्डी लिखति—

'चिन्तयत्येव मयि महार्णवोन्मग्नमार्त्तण्डतुरङ्गमश्वासरयावधूतेन व्यवर्तत त्रियामा समुद्रगर्भवासजडीकृत इवमन्दप्रतापो दिवसकरः प्रादुरासीत्।')

---

१ तत्रैव, पृ८४
२ तत्रैव, पृ.१७९
३ तत्रैव, पृ.१७९
४ तत्रैव, पृ.१८८
५ दशकुमारचरितम् चौ.सं.सी. पृ.४१२-४१३

राजहंसवसुमत्योः वर्णने नादसौन्दर्यं, पदलालित्यं, माधुर्यं च दरीदृश्यते—

'अनवरतत्यागदक्षिणारक्षितशिष्टविशिष्टविद्यासंभारभासुर भूसुरनिकरः; विरचितारातिसन्तापेन प्रतापेन सततुलित वियन्मध्यहंसः राजहंसो नाम धनदर्पकन्दर्पसौन्दर्य सौदर्य हृद्यनिरतद्यरूपो भूपो बभूव'।[१]

[२]तस्य वसुमती नाम सुमती लीलावतीकुलशेखरमणी रमणी बभूव।—भस्मीकृतचेतने मकरकेतने तदा भयेनानवद्या वनितेति मत्वा तस्य रोलम्बावली केशजालम्—सकलसैनिकाङ्गवीरो मलयसमीरो निःश्वास—अस्त्रभूतानि प्रसूनानि तानीतराण्यङ्गानि समभूवन्निव।[३]

युद्धं प्रति गच्छतां राजकुमाराणां वर्णने यमकालङ्कारेण भावानुरूपिणी भाषा प्रयुक्ता।

'कुमारा माराभिरामा रामाद्यपौरुषा रुषाभस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेन यानेनाभ्युदयाशंसं राजानमकार्षुः। तत्साचिव्यमितरेषां विधाय समुचितां बुद्धिमुपदिश्य शुभे मुहूर्ते कुमारं विजयाय विससर्ज'

दण्डी यत्र तत्र दीर्घसमासानपि प्रयुंक्ते। परन्तु ते दुरूहा न सन्ति।

'दन्तच्छदकिसलयलाञ्छिना हर्षास्रसलिलधाराशीकरकणजालक्लेदितस्य स्तनतटचन्दनस्यार्द्रतां निरस्यतास्यान्तरालनिःसृतेन तनीयसानिलेन हृदयलक्ष्यदलनदक्षिणरतिसहचर शरस्यदायितेन तरङ्गितदशनचन्द्रिकाणि कानिचिदेतान्यक्षराणि कलकण्ठी-केलान्यसृजत्'[४]।

---

१ दशकुमारचरितम् चौ.सं.सी.पृ.५

२ दशकुमारचरितम् चौ.सं.सी.पृ.६

३ दशकुमरचरितम् चौ.सं.सी.पृ.४१

४ दशकुमारचरितम् चौ.सं.सी.पृ.३८५

वस्तुतः दण्डिनः कथानां सर्वत्राधारः श्रृङ्गारो रसः। परं रसानामन्येषामपि वर्णनमौचित्याधायकमेव। अकालवर्णने दण्डी बीभत्सरसस्यैवं वर्णनमादधाति—

'क्षीणसारं सस्यं औषधयो वन्ध्याः, न फलवन्तो वनस्पतयः क्लीबा मेघाः, भिन्नस्रोतसः स्रवन्त्यः, पङ्कशेषाणि पल्लवानि—अन्योऽन्यमभक्षयन् प्रजाः, पर्यलुण्ठन्नितस्ततो बलाकापाण्डुराणि नरशिरः कपालानि'।

कामं दण्डिनोपदेशात्मिका शैली नाऽवलम्बिता परं यत्र तत्रोपदेशाः प्रदीयन्ते।

काममञ्जरी मरीचिमृषिं धर्मोपदेशमेवं ब्रवीति—

'ननु धर्मादृतेऽर्थकामयोरनुत्पत्तिरेव।—तन्मन्ये नार्थकामौ धर्मस्य शततमीमपि कलां स्पृशतः'।

एवमेव मन्त्रिणा वसुरक्षितेनानन्तवर्मणे यो नीत्युपदेशो दत्तः स सर्वत्रैव संस्कृतज्ञानां पाठकानां समाजे स्वकीयामर्हतामापादयति।

प्रकृतिरपि दण्डिना विविधरूपेषु चित्रिता। स्वयं दण्डिना काव्यादर्शे लिखितम्—

नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः।
उद्यान-सलिलक्रीड़ामधुपानरतोत्सवैः॥
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।
मन्त्रदूतप्रशणाजिनायकाभ्युदयैरपि॥
अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम्।

एतत्सर्वं महाकाव्यलक्षणे प्रदत्तम्। परं गद्यकव्येऽपि केवलं शैली परिवर्तते पद्यरहिता, शिष्टं सर्वं द्वयोः समानम्। दण्डी सर्वाण्येतानि दृश्यानि दशकुमारचरिते चित्रयति, अत्रा हि सूर्योदयः, सूर्यास्तिः, वसन्तः श्मशानमित्यादिकस्य सांक्षिप्तं सरलं च वर्णनमुपलभ्यते। तत्र वसन्तवर्णनम् यथा—

'अथ मीनकेतनसेनानायकेन मलयगिरिमहीरूरुहनिरन्तरावासिभुजङ्ग मुक्तावशिष्टेनेवं सूक्ष्मतरेण धृतहरिचन्दनपरिमलभरेणेव, मन्दगतिना दक्षिणानिलेन वियोगिहृदस्थं मन्मथानलमुज्ज्वलयन् सहकारकिसलयमकरन्दास्वादनरक्तकण्ठानां मधुकरकलकण्ठानां काकलीकलकलेन दिक्चक्रं वाचालयन् मानिनीमानसोत्कलिकामुपनयन्, माकन्दसिन्दुवाररक्ताशोककिंशुकतिलकेषु कलिकामुपपादयन् मदनमहोत्सवाय रसिकमनांसि समुल्लासयन् वसन्तसमयः समाजगाम'[१] ।

दण्डिनः एतेषां सर्वेषां गुणानां कारणेनैता बहवः समालोचकाः तत्प्रंशसामेभिः रूपैः समकुर्वन्—

मथुराविजयमहाकाव्यरचयित्री गङ्गादेवी तु दण्डिनो वाणीं सरस्वत्या मणिदर्पणं कथयति—

आचार्य दण्डिनो वाचामाचान्तामृतसम्पदाम्।
विकासो वेधसः पत्न्या विलासमणिदर्पणम्॥

अन्या दण्डिसम्बद्धाः सूक्तयः सन्ति—

जाते जगाति वाल्मीकौ कविरित्यभिधाऽभवत्।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि॥
कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः।
त्रयोग्नयस्त्रयो देवास्त्रयो वेदास्त्रयो गुणाः।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः॥
उपमा कालिदासस्य भारवेर्थगौरवम्।
दण्डिनः पदलालित्यम्—॥

---

१ काव्यादर्शः - १-१६, १७, १८

XVII

दण्डिनः अवन्तिसुन्दरी कथा

काव्यादर्शस्य कर्तृत्वं, दशकुमारचरितस्य च कर्तृत्वं तु दण्डिन एव सिध्यति, परं यथा राजशेखरेणोद्धृतं त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः। ततस्तृतीयस्य ग्रन्थस्य विषयेऽधुना प्रायशो निर्णीतमेव यत् तृतीयप्रबन्धोऽवन्ति-सुन्दरीकथैव। अस्य कश्चिदेव खण्डांशो दाक्षिणात्ये जनपदे प्राप्तः। एष चाकारे तथा लघुर्येन ससाहसं न केनापि कथयितुं शक्यते यदियं रचना दण्डिकृतैव।

परमवन्तिसुन्दरी कथा दशकुमारचरितयोः कथासाम्ये ज्ञाते, शैल्यां चावन्तिसुन्दरीकथाया ज्ञातायां निर्णीयते यद्दशकुमारचरितं दण्डिनः प्रथमा रचना, अनन्तरकालीना चाऽवन्तिसुन्दरीकथा। एतत्कथयितुं शक्यते—यद्दश-कुमारचरितं पूर्वं लिखित्वा तस्यैवालङ्कारिकं रूपं रचयितुं दण्डी रचित-वान् अवन्तिसुन्दरीम्।

१९२३ तमे खिस्ताब्दे श्री रामकृष्णकविः प्राच्यविद्यापरिषदो विवर-णेषु अवन्तिसुन्दरीकथा-अवन्तिसुन्दरी-कथासारस्य च तुलनात्मकमध्ययन कृत्वा समसाधयत्—

अवन्तिसुन्दरीकथाया रचयिता दण्डी अस्ति। एषैव अस्य दशकुमार-चरितस्य पूर्वपीठिका। पूर्वमेवास्माभिर्लिखितं यच्चक्रपाणिदीक्षितो नामोत्तर-पीठिकाया लेखकत्वेन पर्यचीयत। न च ज्ञायते पूर्वपीठिकाया लेखकत्वेन कोऽपि।

अवन्तिसुन्दरीकथासारस्तु विद्यते पद्यात्मकः, सप्ताध्याययुक्तो ग्रन्थः। परिच्छेदोऽस्या अन्तिमोऽपूर्णः। इतरत्र च अवन्तिसुन्दरी कथाप्यपूर्णा। अन-न्तशयनग्रन्थमालाया १७२ तमसंस्करणत्वेन १९५४ तमे खिस्ताब्दे प्रका-शिता।

डा. सुशीलकुमार डे महोदयस्तर्केणानेन न स्वकीयां सहमतिमनुमनुते। एष काव्यादर्श-दशकुमारचरित-लेखकं दण्डिनमवन्तिसुन्दरीकथालेखकत्वेन नोररीकरोति।

आगाशे महोदयस्तु दशकुमारचरितं दण्डिकृतं न मनुते। तन्मतानुसारेण ये दोषाः काव्यदोषत्वेन काव्यादर्शे संलिखिताः त एव दशकुमारचरिते प्राप्यन्ते। परमेतन्मतमपि पूर्वमेवास्माभिः प्रकटितम्। क्षेमेन्द्रस्यौचित्यविचारचर्चाया उदाहरणेन च खण्डिमेतन्मतम्। यतो हि क्षेमन्द्रस्य स्वरचितेषूदाहरणेषु ते ते दोषाः समागताः, निषेधो येषां काव्ये तेन कृतः। एतत्समाधानरूपेण चालोचकानां विचारो यत्पूर्वं दशकुमारचरितं दण्डिना लिखितमनन्तरं च काव्यादर्शः। काव्यादर्शस्य च जङ्घालकृतटीकायामवन्ति सुन्दरी कथायाः स्पष्टमुल्लेखो विद्यते।

चौखम्बाविद्याभवनस्य वाराणसीस्थस्य, विद्याभवन राष्ट्रभाषाग्रन्थमालाया अष्टत्रिंशत्तमे पुष्पे 'अवन्तिकुमारियां' (अवन्तिकुमार्यः) इति नाम्ना प्रकाशिते पुस्तके, अवन्तिसुन्दरी-मालविका-सरस्वतीनां कथा हिन्दी भाषायां प्रकाशिताः। तासु प्रथमा अवन्तिसुन्दरी राजवाहनस्यैव नायिकात्वेन चित्रिता।

अत्रत्यं घटनावृत्तं तदेव वर्तते यद् दशकुमारचरितस्य। यद्येषा पुस्तिका प्रामाणिकत्वेन स्वीक्रियते तर्हि कथयितुं शक्यते एषोस्त्यनुवादोऽवन्तिसुन्दर्या नाम्नया कथायाः। परमस्यानुवादकेन १९६१ तमे ख्रिस्ताब्दे प्रकाशितायामस्यां सुस्पष्टमिद न विहितं कस्यानुवादोऽयम्। केवलमिदमेव लिखति—

'संस्कृतसाहिह्यान्तर्गतमेतादृश्योऽनेकाः कथा विद्यन्ते, श्रूयन्ते च। या हिन्दीभाषायामनूदिताः सत्यः पाठकानां मनोरञ्जनमादधति'[१]

---

१ अवन्तिकुमारियाँ, देवदत्तशास्त्री भूमिका-पृ.२

अत्र दशानामेव राजकुमाराणां साहसिककृत्यानि राजवाहन-दैवसंयोग-मातंग-वामलोचना-बालचन्द्रिका-अवन्तिसुन्दरीनामकेषु खण्डेषु विभक्तानि। वामदेवस्यर्षेः चरितमपि तथैव यथा दशकुमारचरिते। वामदेवस्य भविष्यवाण्येव च सफला जायते। अस्या अन्तिमेऽवन्तिसुन्दरीभागे वृत्तं तथैव यथा दशकुमारचरिते।

तथाहि—कुमारं राजवाहनं राज्येऽभिषिच्य वने वस्तुमियेष। परं दशैव राजकुमारा तं निवर्तयितुमुद्यताः। परं वामदेवस्तानबोधयत्, वृद्धो महाराजः, तस्यवनगमनमेव सुखदम्। आवश्यकतायां सत्यामेष परामर्शं दास्यति। एष मया सह ममाश्रम एव वत्स्यति।[१]

ऋषेः परामर्शमधिगत्य सर्वे राजकुमाराः स्वस्वाराजयं पालयितुमारब्धाः। यदा कदा ते परामर्शं ग्रहीतुं चक्रवर्तिनो राजवाहनस्य सम्पर्कमधिगच्छन्ति स्म। अस्याः कथाया अनुसारं समस्तदेशशासनं प्रान्तेषु विभक्तमप्येकसूत्रे सूत्रितमासीत्।

कामामालोचका इममवान्तिसुन्दरीकथाया अनुवादं स्वीकुर्युर्नवा परं प्रतीयत एषोऽनुवादोऽवन्तिसुन्दरीकथायाः।

ऐम.आर.काले महोदयोऽवन्तिसुन्दरीकथायाः कांश्चिद्गद्यभागान् एवं प्रदर्शयति—

'शरदिव सरसां कान्तिमुद्वहन्ती हेमन्तवृत्तिरिव प्रालम्बिनीहारमालिनी, शिशिरश्रीरिव नववनमालिका, वसन्तवेलेव चारु भुजवासभूषित तनुलता—रतिरिव दर्पकस्य, शचीव शतमखस्य शैलसुतेव विश्वेश्वरस्य लक्ष्मीरिव पुष्पकरेक्षणस्य बुद्धिरिव धनाधिपस्य, देवसेनेव सेनापतेः रोहिणीव बुधभावनस्य अंसुभ्योऽपि वल्लभा देवी वसुमती नाम'।[२]

---

१ अवन्तिकुमारियाँ, देवदत्तशास्त्री भूमिका पृ.४४
२ अवन्तिसुन्दरी कथा पृ.१३

'प्रतिमुखस्थित कुवलयक्रोडादिवातिवामानि यामिनीनामरज्यन्त लोचनानि। चकोरलोचनाकुचारोहचक्रः संमर्देऽपि कलुषीभवद्भिरम्बुभिरौत्पत्तिकत्वं जलत्वमनक्षरमाचचक्षे।[1]'

'कुसुमशरशरावलीष्विव विरहिजन हृदयदारिणीषु समन्ततः पतन्तीषु हंसमालासु वसुधाविभ्रमहेमचूर्णैरसन रेणुभिरभिनवमनसिजातुरास्विन्नसुभगासु वनस्थलीषु... शल्मलीतूलपरिलघूनि मेघकुलानि विलोक्य दर्पादिव मत्तमधुकरीमधुरध्वानगर्भं हसन्तीषु कुमुदिनीषु विशदायां शरदि[2]'


एवमेतैः गद्यखण्डैर्यदाऽवन्तिसुन्दरी कथाऽवश्यमेव निर्णीता। कथेयं पूर्णतो यदोपलस्यते तदैव द्वयोरेतयोः साम्यं संशोधकैस्तुलितं भविष्यति।[3]

केचित्समालोचका छन्दोविचितिं द्विसन्धानकाव्यं वा दण्डिनस्तृतीयं प्रबन्धं स्वीकुर्वन्ति। तत्र छन्दोतिचिति सम्बन्धे तु पूर्वमेवास्माभिर्निर्णीतं यदिदं छन्दोग्रन्थ एव। स च छन्दः शास्त्रकारेण पिङ्गलेनेव लिखितः।

भोजस्तु शृङ्गारप्रकाशे द्विसन्धानकाव्यं दण्डिनः कृतिरूपेण स्वीकरोति। न चैवोपलभ्यतेऽद्यावधि ग्रन्थ एष। भोजोऽपि निर्णायकत्वेनेमं ग्रन्थ दण्डिकृतं न स्वीकरोति, स लिखति -

उदाहरणं यथा दण्डिनो धनञ्जयस्य वा द्विसन्धानप्रबन्धे।

अत एष द्विसन्धानकाव्यं नाम ग्रन्थो न कथमपि दण्डिकृतं स्वीक्रियते



१ अवन्तिसुन्दरी कथा पृ. १३

२ तत्रैव पृ. १६

३ भोजः शृङ्गारप्रकाशः, अध्यायः ११



जन्म - ६-९-१९३७

जन्मस्थानम्- ग्रामः-रोहटः, मण्डलम् सोनीपतः (हरियाणा)

शिक्षा - शास्त्री १९५३, पञ्जाबविश्वविद्यालये सर्वप्रथमः, एम.ए.१९६३ दिल्ली विश्वविद्यालयः, पी.एच.डी १९७० दिल्ली विश्वविद्यालयः।

अध्ययनक्षेत्रम् - साहित्यशास्त्रम्, व्याकरणम् च

प्रकाशितानि शोधपत्राणि - दिल्ली विश्वविद्यालय-दक्षिणपरिसरे समवेतानां परिचर्चानां पुस्तकारेषु प्रकाशनेषु बहवो लेखाः।
- ओरियण्टल कान्फ्रेंस रोहतकमण्डले प्रकाशितो लेखश्च।

प्रकाशितो ग्रन्थः- अभिधाविमर्शः, दिल्ली १९८०
शीघ्रप्रकाश्याः रचनाः- ब्रह्मसूत्रशांकरभाष्यम्, एकादशटीकाभिः सह सम्पादितम् ॥

कार्यक्षेत्रम् .- दिल्ली विश्वविद्यालयस्थे, हिन्दूमहाविद्यालये,
प्राध्यापकः- १९६९-१९८६
प्रवाचकः- १९८७-१९८८
गुरुकुलकांगड़ी विश्वविद्यालये प्राचार्यो विभागाध्यक्षश्च- १९८८-१९८९
वर्तमाने हिन्दूमहाविद्यालये प्रवाचकः।



राष्ट्रिय-संस्कृत-संस्थानम्

ए-४०, विशाल एन्कलेव, राजा गार्डन,
नई दिल्ली-११००२७ (भारत)